॥ श्रीः ॥

श्रीभवानीप्रसादाय सादरं समर्प्यते ।

अर्वाचीन साहित्यविवेचना ।

लेखकः

साहित्याचार्य,

श्रीशालग्रामशास्त्री ।

श्रीः

अर्वाचीनसहित्यविवेचना

तत्सम्बन्धे

अस्मत्कर्तव्यञ्च

हरिद्वारस्थऋषिकुले प्रधानाध्यापकेन

साहित्याचार्य श्रीशालग्रामशास्त्रिणा

लिखितो

निबन्धः

सं० १९७३ वि०

पं० ब्रजनाथशर्मणा कारोनेशनयन्त्रालये

आगरा नगरेमुद्रितः

विषय सूची

इति

श्रीः।

अर्वाचीनसाहित्यविवेचना

तत्सम्बन्धे

अस्मत्कर्तव्यञ्च

(निबन्धा- साहित्याचार्यश्रीशालग्रामशास्त्री, बरेली)

'इन्दीवरदलश्याममिन्दिरानन्दकन्दलम्,
वन्दारुजनमन्दारं वन्देऽहं नन्दनन्दनम्'।

मल्लिनाथः।

आशोणा कोणदेशाद्, विकसितकुमुदामोदिनी पार्श्वभागात्,
नीलेन्द्राक्रान्तकान्ता कलिकलुषहरा संसरन्तीव मध्यात्।
व्योमस्थेव त्रिवेणी, त्रिगुणवशकरी देवतेव त्रिरूपा
त्रीन् संस्कारान् धमन्ती जयति नयनयोः कापि कान्तिर्भवान्याः।१।
स्रोतांसि वात्सल्यरसस्य शश्वत्समुत्सृजन्ती जनताहिताय।
सा भक्तिवित्तैकदयाविधेया पुनातु नेत्रद्युतिरम्बिकायाः।२।

क्वाहमप्रौढवागर्थः क्व चेयं संसदिन्दिरा।
सुधर्मस्पर्धिनी धन्या कुशाग्रधिषणाऽऽस्पदम्।३।

येषां पुरो निखिलवाक्पतिरप्युदञ्चं संकोचमञ्चति वचःसु कथन्त्वमीषु॥
तिष्ठत्तु वाक्प्रसर एष ममाऽथवा स्युर्डिम्भस्य दुर्विलसितानि मुदे गुरूणाम्।४।

अत्र खलु निबन्धे—

किं नाम साहित्यममुत्र किं च कर्तव्यमस्माकमितीदमद्धा।
विवेचनीयं भवतां पुरस्तादनुग्रहश्चेदवधानदानम्।५।

इदं दृश्यमानं निखिलमपिजगत् शब्दोऽर्थश्चेति विभागद्वयकुक्षावेव निलीनं वर्तते। न किञ्चिदिह तादृशं पश्यामो यद् घटपटादीन् शब्दान् कम्बुग्रीवादिमतोऽर्थांश्चातिरिच्य अवशिष्यमाणं दृश्येत।

ईश्वरेच्छारूपेण, इच्छारूपेण वा पदार्थान्तरेणैव वा शब्दस्यार्थगतेन, अर्थस्य वा शब्दगतेन शक्त्याख्येन व्यापारेण तत्र तत्र प्रयुज्यमानास्तै ते शब्दास्ताँस्तानर्थानुपस्थापयन्ति ।

यदि नाम इदं शब्दाभिधं ज्योतिर्नाभ्युदियान्मानवेषु, नूनं सर्वेऽपि संव्यवहारा आमूलचूलमुच्छिद्येरन् । शब्दमन्तरेण, बोधयितुमिष्टस्यार्थस्य उपस्थापनं कथमिव सम्भवेत् ?। सम्मुखमवस्थितेषु पदार्थेषु अङ्गुलिनिर्देशादिना कथञ्चिद् ज्ञापितेष्वपि परोक्षवृत्तीनां बोधौपयिकं दुःशकमेव लब्धुम् ।

अनुपस्थितघटो हि जनो घटानयनाय पुरुषान्तरं प्रेरयितुमिच्छन् किं वा प्रतिपद्येत ?। दुःखदुःखेन करचरणादीनामनेकाभिः क्रियाभिः, आकृतिमतां पदार्थानां कृतेऽपि ज्ञापने निराकृतीनां बोधनाय नितरां नास्त्येव शरणम् ।

यदा इयं दुरवस्था वर्तमानकालिकेष्वेव पदार्थेषु महान्तमन्तरायमापादयति, तदा कैव कथा अतीतानागतानां बोधनस्य । असति खलु शब्दमये ब्रह्मणि न तादृशी कापि शक्तिर्जागर्ति जगति, यया साम्प्रतिकानामपि विवेकवतामुच्चतरान् विचारान् गहनतरान् वा शास्त्रार्थान् प्रेक्षावतामग्रगण्या अपि प्रतिपत्तारो यथायथं प्रतिपद्येरन् । येषां पुनर्द्रष्टारो वक्तारश्चातिचिरन्तनास्तेषां वेदादिशास्त्राणाम् अवगमोपायस्य तु न दुराशालेशोऽपि सम्भवी । इदमेवाभिप्रेत्य उक्तं महाकविना दण्डिना—

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।१।

(काव्यादर्शः)

अत्र कविना शब्दे ज्योतिष्ट्वमारोप्य तदभावसामानाधिकरण्येन अन्धतमसत्वं सम्भावितम् ।

युक्तं चैतत् ।

विरुद्धधर्मणी हि प्रकाशतमसी न शक्ये सामानाधिकरण्येनाधिगन्तुम् । एकविनाकृतस्य अपरस्योपस्थितिस्तु नैसर्गिकी न यत्नान्तरमपेक्षते ।

न खलु स्फीतमालोकमानेतुं कृतो यत्नो नान्धतमसं निवारयति । प्रय-

ज्ञान्तरं वा प्रतीयते । एवञ्च महाकविसम्भावनाविषये शब्दाह्वयस्य ज्योतिषोऽभावे भुवनत्रयस्यान्धतमसान्तर्वर्तित्वन्तु नैसर्गिकत्वमतिक्रामति।

तथापिइदमिह चिन्तनीयम्, यत्, यस्मिन्नधिकरणे ज्योतिर्न द्योतते तस्मिन्नधिकरणे अन्धतमसमाविर्भवतीति हि वस्तुस्थितिः, न पुनस्तदधिकरणमपि अन्धकारस्वरूपतामापद्यते । उक्ते पद्ये पुनः कविना शब्दाह्वयस्य ज्योतिषोऽभावे भुवनत्रयस्यैव अन्धतमसत्वमुक्तम् ।

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ इति ॥

आवेदितमेव इदमधस्ताद् यद्, अविद्योतमाने शब्दमये ब्रह्मणि सर्वविज्ञानव्यवहारोच्छेदः स्यादिति । अस्मिन्नेव हि सर्वा विद्या निखिलानि तन्त्राणि सकलाश्च कला परिसमाप्यन्ते । किं बहुना? निरतिशयानन्दचैतन्यम् एकरसम् अद्वितीयम् ब्रह्मापि औपनिषदमित्युच्यते । उपनिषदा हि तज्ज्ञाप्यते । तस्मात् तदपि स्वं ज्ञापयितुं शब्दमुखं प्रेक्षते, इतरेषां तु कथैव का ? नाविदितमिदं यद् रसमयभणितीनां मार्गदर्शिनोर्भगवतोर्वाल्मीकिव्यासयोः शब्दब्रह्मानुग्रहादेव अद्यापि मर्यादापुरुषोत्तमादिचरितम् आदर्शपुरुषाणां शीर्षण्यं धर्मोद्धारकाणां शरण्यं चास्ते । न केवलं लौकिकानामेव कवीनामियं दशा, अपि तु यदि नाम वेदा नाभविष्यन्, कःखलु निरालम्बनोऽसाक्षात्कृतधर्मा भगवति विश्वविधातर्यपि अद्धास्यत् । 'कविर्मनीषी परिभू' रित्यादि वेदवाक्येषु 'कवि' रिति भगवतः स्वयम्भुवो विशेषणं कं भावमुद्भावयतीति तु विभावितमेव भावनावद्भिः ।

नूनम् अनिर्वचनीयमहिम, खल्विदं शब्दब्रह्म, यन्महिमानमुपासीनाः परिहापितभौतिकवपुषोऽपि अप्रलयभङ्गुराणि तेजोमयानि नाकिनामपि कमनीयानि वराणि कलेवराणि वृण्वानास्तानि तानि पावितजगन्ति पुण्यश्लोकचरितानि प्रकाशयन्तो मणिप्रदीपा इव आकल्पं प्रकाशन्ते ।

तद् यदीदम् अमरीकरणोपायभूतं पुण्यश्लोकचरितानाम्, पीयूषवर्षो विचारवताम्, सर्वस्वं कवीनाम्, उपहासकरं करालतमस्यापि कालस्य, तेजोधर्षितजरामरणचक्रम् कविसृष्टमप्यनश्वरम्, जडतापहारकमपि जडतापकरम्, अन्धतमसध्वंसकं ज्योतिर्मयं शब्दब्रह्म न द्योतेत, तदा आहारनिद्रा-

भयमैथुनादिकतिपयपशुसाधारणव्यवहारनिर्वाहे सम्भवत्यपि सर्वविज्ञान-व्यवहारविलोपेन निःसंशयं मानुषा वनमानुषा एव स्युः। सभासम्मेलन-प्रभृतीनान्तु नामापि न श्रूयेत। शास्त्रविचक्षणानां, सम्पादकाचार्याणां, निबन्धलेखकानां च गन्धोपि नानुभूयेत। को वा तदानीमिमान् मानवान् तमोबहुलेभ्यस्तिर्यग्योनिभ्यो व्यवच्छेत्तुमीशीत ?

ज्ञान विज्ञानादीनां परमोपायभूते अस्मिन् ज्योतिषि अनुन्मिषति कुतो वा ज्ञानचन्द्रोदयः ? असति च ज्ञाने केन वा शक्या ज्ञानपूर्विका कृतिः सम्पादयितुम्। सञ्जाते च ज्ञानप्रकाशस्य क्रियायाश्च अभावे दुर्निवारं दुष्परिहरञ्च तमसां साम्राज्यम् "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" इति हि वर्णयति भगवान् पतञ्जलिर्योगसूत्रेषु। तत्प्रकाशक्रिययोर्विनाभावे सर्वतो भावेन विजृम्भमाणे सन्तमसे असन्दिग्धं सर्वमिदं जगत् अन्धतमसमेव स्यादिति सुष्ठूक्तं महाकविना—

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

शब्दस्य महादेवत्वमाचक्षाणा श्रुतिरप्याम्नायते—

'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश' इति।

तदिदमुपवर्णितं शब्दब्रह्म, १ शब्दप्रधानतया, २ अर्थप्रधानतया, ३ रसप्रधानतया च त्रिधात्मानं विभज्य पर्यवतिष्ठते।

तत्र केचित् प्रवर्तनापरपर्यायशासनाऽनुकूलव्यापारप्रधानत्वं शब्दप्रधानत्वम्—यथा प्रभुः इष्टे, अनिष्टे निष्फले चार्थे यथेच्छमनुगामिनः प्रेरयति, तथा वेदादिरपि अनुरूपफलोपधायके ज्योतिष्टोमादौ, प्रतिरूपपरिणामोपस्थापके श्येनादौ, प्रत्यवायपरिहारमन्तरेण फलान्तरस्याऽश्रवणात् निष्फले सन्ध्यावन्दनादौ च अधिकृतान् प्रयोजयति; यथा च प्रभोरादेशा भयेनावश्यमनुष्ठेया भवन्ति, एवं वेदादीनामनुशासनमपि प्रत्यवायं शङ्कमाना जना अवश्यमाश्रयन्तीत्याहुः।

अन्ये तु समीहितार्थलाभाय "अत्यज्यमानमुख्यार्थकत्वं शब्दप्रधानत्वम्" छन्दोब्राह्मणादीनामुपदेशकविधेयांशस्य लक्षणादिना अन्यथानयनाऽभावात्, "न विधौ परः प्रयुज्यते" इति सिद्धान्तात्—इति वदन्ति।

अपरे पुनः शब्दपरिवृत्त्यसहत्वं शब्दप्रधानत्वमिति अनुमतार्थं लक्षणमाचक्षते। व्याचक्षते च एवम्—यथा अद्य प्रभृति देवदत्तः 'समरसिंह' इत्युपाधिना व्यवहर्तव्य इति प्रभुणा आदिष्टे तेनैव शब्देन जनास्तं व्यपदिशन्ति, न पुनस्तत्समानार्थकेन 'संग्रामकेसरी' त्यादिना केनचित्पदेन। एवं वेदेष्वपि 'अग्निमीले' इत्यादीनाम् अन्यतमस्यापि पदस्य पर्यायोपनिबन्धे स्थानविपर्यासे वा न शक्यं वेदत्वं वक्तुम्, पारायणादौ वा तथा पुण्यजनकत्वं प्रतिपादयितुम्-इत्येतेषां शब्दप्रधानत्वम्। अत एव एषां प्रभुशब्देत्यभिधानेनापि व्यपदेशः।

एते हि शब्दपरिवृत्तीरसहमाना अनुष्ठानव्यतिरेकेण प्रत्यवायकरा राजशासनमिव भयेन अनुष्ठीयमानाः प्रभुशब्दा इव प्रभुशब्दा इति। एतल्लक्ष्यं प्रायः सर्वमेव वैदिकं वाङ्मयं तदुपजीवकाश्च निबन्धाः।

अर्थप्रधानता च द्वितीया कक्षा शब्दस्य, यत्र हि-शब्दाः परिवृत्तिं सहन्तामपि, अर्थस्तु स्वस्वरूपे समुत्पद्यमानं मनागपि वैरूप्यं न लभते।

इतिहासपुराणधर्मशास्त्रादीनि अस्यान्तर्गतानि। यदाहुरितिहासलक्षणम्—

"धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
वृत्तवस्तुकथायुक्तमितिहासं प्रचक्षते"।

इतिहासे हि यथावृत्तस्यैव वस्तुनस्तद्रूपैव कथा स्थानं लभते।

सापि चेच्चतुर्वर्गे नान्यतमस्याप्युपदेशिनी, नास्पदं विन्दति।

'पुराणं पञ्चलक्षणम्'—धर्मशास्त्रञ्च निगदव्याख्यातम्, एवमादिषु अर्थस्यैव प्राधान्यम्। अयं हि सुहृत्सम्मितः शब्द इत्युच्यते। यथा सखा सखायं सत्पथे प्रवर्तयितुमीहमानोपि न राजशासनमिव आदेष्टुमीष्टे, किन्तु सदसती वर्त्मनी विशोध्य तत्फलं निवेदयति, तथेतिहासादिकमपीति सुहृदा समं सम्यङ्मितत्वात्सुहृत्सम्मितमित्युच्यते।

अथापरो रसाङ्गभूतव्यापारप्रवणतया शब्दार्थौ गुणीभावयन् रसप्रधानः शब्दः 'कान्ताशब्दः,' इत्युच्यते।

यथा च काचन कमनीया कामिनी निजं प्रणयिनं कटाक्षभ्रूविक्षेपादिना आवर्जयन्ती, तदन्तरङ्गं रसवर्षेण तरलयन्ती मनीषितमावेदयति। प्रभवति च न चिरादेव तथाविधमात्माभिलषितं रसपरवशेन हृदयश-

लम्भेन सम्पादयितुम्, तथा रसप्रधानं काव्यादिकमपि शृङ्गार, वीर, करुणादिनानाविधरसप्रसरपूरपूरितानि आनन्दनिमग्नानि यथावदावर्ज्य सचेतसां चेतांसि सम्यक्कर्षणवर्षणाभ्यां सुसम्पन्ने क्षेत्रे प्रत्युप्तं बीजमिव कृत्याकृत्योपदेशम् अचिरेणैव प्ररोहयोग्यम् अङ्कुरदलपल्लवकाण्डपुष्प-फलादिसम्पत्समृद्धं च साधु साधयतीति कस्तत्र प्रभवति पराङ्मुखो भवितुं विना नष्टादृष्टान्तरविशेषात्।

मधुरिमप्रसाधितमुखो हि निखिलोपि लोकस्तिक्तमपि रसं सुखेन निगिलति, अथ चेत् पुरस्तादेव तिक्ततयोद्वेजितो न मधुरिमण्यपि विश्व-सिति, अत एव सरसतापादनेन सर्वात्मनावर्जितेषु प्रतिपत्तृणामन्तरात्मसु कटुरपि उद्वेजकोपि च उपदेशस्तथा निधीयमानो न मनागपि वि-मनीकरोति।

वैचित्र्येण प्रतिपाद्यमानः स एव चार्थोऽद्भुत इव अनुभूयमानो भूयो भूयोपि श्रुतिविषयीभूतो नभवत्युद्वेगाय।

'सदा चरति खे भानुः सदा वहति मारुतः' इत्ययमर्थो 'भानुः सकृद्युक्त तुरङ्ग एव, नक्तन्दिवं गन्धवहः प्रयाति' इत्यनया रीत्या प्रकाशितः कामपि च-मत्कृतिं बिभर्तीति न निगूहितं सहृदयेषु। एतामेव शैलीममोघां मन्वानै-र्वेदविरुद्धैर्बौद्धादिभिरपि अस्मिन् विषये बहूनि निबद्धानि सूत्रादीनि।

किं बहुना, सर्गस्थितिसंहारकारणेन जगदादिभुवा भगवता स्वयम्भु-वापि वेदेषु तत्रतत्र निजं मङ्गलमयमुपदेशं विशदीकर्तुं समाश्रितैर्बहु-भिरलङ्कारैः अन्धोपि बधिरोपि च निर्णेतुं पारयते एतद्—यद् अविकल-मर्थं प्रतिपादयितुं कियतीव उपयोगिता आलङ्कारिकमार्गस्याऽस्येति।

सर्वविद्यानिधानभूतापि च त्रयी न प्राधान्येन विषयमिमं व्यवस्था-पयितुं प्रवृत्तेति साकल्येन दुर्लभमेव तत्र एतद्दर्शनम्। यदेव च उपलभ्यते न तदप्यपर्याप्तम्।

यद्यपि वाङ्मये अभिधेयविनाभूतः शब्दो दुःशक एव लब्धुम्, शब्द विरहितश्च प्रत्ययो लोके प्रतिपत्तुम्। यदाहुः 'न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते' इति शाब्दिकैस्तु शब्दार्थयोरभेदसंसर्ग एव स्वीकृतः। तेन शब्दप्रधाने अर्थस्य, अर्थप्रधाने वा शब्दस्य, रसप्रधाने वा उभयोः शब्दार्थयोरसंस्पर्शो न सम्भवत्येव; तथापि "प्रधानेन हि व्यपदेशा भवन्ती"

तिन्यायात् यत्र एकस्य प्राधान्यं, विश्रान्तिधामत्वञ्च—अपरञ्च सदपि अनुन्नतस्कन्धतया प्रधानाङ्गभूतमेव आत्मानं निवेदयति, उपकारकता-मुपस्कारकताञ्च भजते, तत्र मुख्यमेवादाय व्यपदेशो भवितुं युक्त इति न किञ्चिद् विरुद्धम्। एवञ्च रसप्रधाने सन्तावपि शब्दार्थौ न किञ्चिद् विकुर्वाते रसस्य प्राधान्ये—प्रत्युत आनुकूल्यं भजतः– सति हि अप्रधाने प्राधान्यं शक्यं प्रतिपत्तुम्।

अथ कोऽसौ रसो यत्प्रधानोऽयमधस्तादावेदितः शब्द इति रसं कि-ञ्चिद् विवेचयिष्यामः।

तत्र अद्यत्व उपलभ्यमानेषु साहित्यसन्दर्भेषु भरतवाक्यानामुपष्टम्भ-कतया उद्धरणात् भरतप्रणीता एव प्रबन्धाः प्राचीनतमाः प्रामाणिकाश्चेति सुशकं प्रमाणीकर्तुम्। भरतेन तु साहित्यसूत्रेष्वेवमसूत्रि रसविषये।

'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति' रिति। एतद्व्या-ख्यातृषु अलङ्कारशास्त्रे अलङ्कर्मीणो रसप्रवीणः श्रीमदभिनवगुप्तपादाचार्य-स्तदनुसारिणश्च, सांख्येषु संख्यावान् श्रीभट्टनायकः, मीमांसामांसलप्रज्ञो भट्टलोल्लटस्तदनुगामिनश्च, न्यायनयनिष्णातः श्रीशङ्कुकः, अन्ये च तत्सूत्रा अपि बहवो नैकविधाभिः शेमुषीभिरुन्मेषितं विविधमिदं विवृण्वते—

१—तत्र "विभावानुभावव्यभिचारिणां" "संयोगात्" समुदायात् 'रस-निष्पत्तिः' रसपदव्यवहार इति सूत्राशयं मन्वानाः कतिपये "विभावाद-यस्त्रयःसमुदितारसः" इति रसस्वरूपं निरूपयन्ति, एतानेव निराकर्तुं काव्यप्रकाशे चतुर्थोल्लासे, "न खलु विभावानुभावव्यभिचारिण एव रसः-- अपि तु रसस्तैरित्यस्ति क्रमः-स तु लाघवान्न लक्ष्यते" इत्युक्तं श्रीमता मम्मटभट्टेन।

२—बहवःपुनर्विभावादीनां' 'संयोगात्' सम्यग्योगात्- चमत्का-रात् रसनिष्पत्तिरितिसूत्रार्थंपश्यन्तः विभावादिषु यत्प्रधानतया चमत्कारि स रस इति वर्णयन्ति। इदमपि 'न विभावादय एव रस' इति पूर्वेणैव प्रत्युक्तम्।

३—केचित्तु 'भाव्यमानो विभाव एव रस' इति मन्यन्ते।

४—अन्ये भाव्यमानो ऽनुभावस्तथा इति कथयन्ति।

५—तदितरे च सञ्चारी एव तादृशस्तथा परिणमतीत्याचक्षते।

मतत्रयमपीदमुत्सूत्रमिति प्रामाणिकाःप्राहुः । तथाहि—यथा व्याघ्रादयोभया नकस्य विभावा एवं वीराऽद्भुतरौद्राणामपि, यथा च अश्रुपातादयः श्रृङ्गारस्य अनुभावा एवं करुणादीनामपि, चिन्तादीनां च समानं सञ्चारित्वं श्रृङ्गारवीरादिषु । एवञ्च अन्यतमस्य रसान्तरसाधारण्येन नियतरसव्यञ्जकतानुपपत्तेः सूत्रे (भरतस्य) मिलितानामुपादानम् इति स्फुट एव अन्यतमेन रसनिष्पत्तिं स्वीकुर्वतां सूत्रविरोधः ।

"विभावानुभावव्यभिचारिभिः' 'संयोगात्' व्यञ्जनात् 'रसस्य' चिदानन्दविशिष्टस्य स्थायिनो, रत्याद्युपहितस्य चिदानन्दात्मनो वा 'निष्पत्तिः' स्वरूपेण प्रकाशनम् इति भरतसूत्रस्य हृदयं विशदीकुर्वतां मार्मिकाणामालङ्कारिकाणां तु मतम् 'व्यक्तःस तैर्विभावाद्यैःस्थायी भावो रसःस्मृतः' इति प्रकाशोक्तया कारिकया प्रकाश्यते ।

'तै'रिति कथनेनापि त्रयाणां प्रतीतौ सम्भवत्यां 'विभावाद्यै' रित्युपादानं मिलितानामेव तेषां कार्यकरत्वसूचनार्थम् ।

'व्यक्तः' व्यक्तिविषयीकृतः--व्यक्तिश्च भग्नावरणा चितिशक्तिः । यथा हि शरावादिना पिहितो दीपस्तन्निवृत्तौ सत्यां सन्निहितान् पदार्थान् प्रकाशयति, स्वयं च प्रकाशते—एवमात्मचैतन्यं विभावादि संवलितान् रत्यादीन् प्रकाशयत् स्वयमपि प्रकाशते ।

अन्तःकरणधर्माणामपि साक्षिभास्यत्वाभ्युपगमेन, यथा स्वप्ने तुरगादीनां यथा वा जाग्रति रङ्गरजतादीनां साक्षिभास्यत्वं स्वीक्रियते, एवं विभावादीनामपि साक्षिभास्यत्वम् अविरुद्धमेव । उत्पन्नो रसो विनष्टो रस इति व्यपदेशस्तु व्यञ्जकविभावादिचर्वणायाःआवरणभङ्गस्य वा उत्पत्तिविनाशयो रस उपचारात् निर्वाह्यः ।

यथा च वर्णनित्यतावादिनां वैयाकरणानां नये व्यञ्जकताल्वादिव्यापारस्य निवृत्तौ सन्नपि नित्योऽकारादिर्न प्रकाशते-एवमत्रापि-विभावादिचर्वणावधित्वादावरणभङ्गस्य निवृत्तायां तस्यां प्रकाशस्याऽऽवृतत्वाद्विद्यमानोपि स्थायी न प्रकाशते ।

यद्वा-यथा सविकल्पसमाधौ वितर्कविचाराद्यालम्बनेन तदाकारा योगिनश्चित्तवृत्तिरुपजायते—तथा सहृदयस्य निजसहृदयतावशोन्मिषितेन विभावादिचर्वणामहिम्ना रत्यादिस्थाय्युपहितस्वस्वरूपाऽऽनन्दा-

कारा चित्तवृत्तिः सम्पद्यते--तन्मयीभवनञ्च रस इति। अत एवाऽयं ब्रह्मास्वादसहोदर इत्युच्यते।

आनन्दो ह्ययं न लौकिकसुखान्तरसाधारणः--अन्तःकरणवृत्त्यवच्छिन्नचैतन्यासरूपत्वात्। इत्यञ्च श्रीमदभिनवगुप्तपादाचार्य,-राजानक-श्रीमम्मटभट्टप्रभृतीनां ग्रन्थस्वारस्यात्, भग्नावरणचितिशक्तिविशिष्टो रत्यादिः स्थायी भावो रस इत्यास्थितं भवति।

'रसो वै सः' 'रसᳬ ह्येवाऽयं लब्ध्वाऽऽनन्दी भवति' 'एष ह्येवाऽऽनन्दयाति' इत्यादीनां तैत्तिरीयेष्वाम्नातश्रुतीनां स्वारस्याद् आत्मैव रस इत्यवसीयते। तेन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः--इति आंशिकं भट्टनायकमतानुसारि पण्डितेन्द्रस्य मतम्।

उभयत्रापि चात्र विशिष्टात्मनोऽस्य विशेषणं विशेष्यं वा चिदंशमादाय नित्यत्वं स्वप्रकाशत्वं च सिद्धम्। रत्याद्यंशमादाय तु अनित्यत्वमितरभास्यत्वञ्चेति।

चर्वणा चास्य चिद्गतावरणभङ्ग एव, प्रागुक्ता तदाकारा अन्तःकरणवृत्तिर्वा। इयञ्चपरब्रह्मास्वादात्समाधेर्विलक्षणा, विभावादिविषयसंवलितचिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्। ननु च अस्या सुखांशे किं मानमिति चेत्, समाधावपि सुखांशे किं मानमिति समानः पर्यनुयोगः। यदि तु तत्रास्ति शब्दः प्रमाणमित्युच्यते, तदात्रापि पूर्वोक्तश्रुतीनां प्रामाण्यं निर्बाधमेव, किं च सकलसहृदयप्रत्यक्षमप्यस्य भवतीत्यस्ति प्रमाणद्वयम् इति।

भट्टनायकास्तु पूर्वोक्तसूत्रस्यार्थमेवमाहुः--

'विभावानुभावव्यभिचारिणां' 'सम्यक्' साधारणात्मतया 'योगात्' भावकत्वव्यापारेण भावनाद् 'रसस्य' सत्त्वोद्रेकप्रकाशितस्थाय्युपहितस्वात्मानन्दरूपस्य "निष्पत्ति" र्भोगाख्येन साक्षात्कारेण विषयीकृतिः, इति

एतन्मतस्यायंनिष्कर्षः-- यदि काव्यनाटकादौ "रामो सीताविषयकानुरागवान्" इत्यादिरूपेण तटस्थतया रसभानं स्यात्, तदा न स्वाद्यत्वमस्य सम्भवेत्, प्रत्युत लोके अन्यदीयरहस्यदर्शनमिव नितरां परिहरणीयंस्यात्। अहं सीताविषयकानुरागवान्--इत्याकारेण तु प्रत्ययो दुर्घटः।

यतो न खलु सीतादयः सामाजिकान् प्रति आलम्बनविभावा भवन्ति, विना च विभावं निरालम्बनस्य रसस्याप्रतिपत्तिः । नच सामाजिकान् प्रत्यपि साधारणं कान्तात्वं विभावतावच्छेदकं तत्रास्तीति वाच्यम्, अप्रामाण्यनिश्चयानालिङ्गितस्य अगम्यात्वप्रकारकज्ञानविरहस्य विशेष्यता-सम्बन्धावच्छिन्नप्रतियोगिताकस्य विभावतावच्छेदककोटौ अवश्यं निवेश्यत्वात्, अन्यथा स्वस्रादेरपि साधारणविभावतावच्छेदककान्तात्वा-वच्छिन्नतया विभावत्वापत्तेः । एतादृशज्ञानानुत्पादस्तु प्रतिबन्धकान्तर-निर्वचनमन्तरेण दुरुपपाद एव । स्वस्मिन् रामाद्यभेदबुद्धिरेव तथा स्यादित्यपि नोपपद्यते, नायके धराधौरेयत्व—वीरत्वादेः आत्मनि च आधुनिकत्व—कापुरुषत्वादेः स्फुटमुपलम्भादभेदबोधएव तावद्दुर्लभः ।

किंच केयं प्रतीतिः ? प्रमाणान्तरेण अनुपस्थापनात् शाब्दीति चेत्, श्रूयताम्-यथा काव्यादन्यैर्व्यावहारिकशब्दैर्जायमाना नायकवृत्तान्तसंविदः अहृद्या भवन्ति, एवमियमपि स्यात् । मानसीयं प्रतीतिरित्यपि च न शक्यं वक्तुम् । चिन्तोपनीतानां तेषामेव पदार्थानां मानसप्रतीतेः अस्यां वैलक्षण्यस्य स्फुटमुपलब्धेः । नापि चेयं स्मृतिः सम्भवति, तथा प्रागननुभवात् । तस्मादिदं प्रतिपत्तव्यम्, यद्—अभिधया निवेदिताः पदार्थाः भावकत्वनामकेन व्यापारेण अगम्यात्वादिरसविरोधिज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानुकूलधर्मपुरस्कारेण अवस्थाप्यन्ते । एवं साधारणीकृतेषु रामसीतादेशकालवयोऽवस्थादिषु पङ्क्तौ पूर्वव्यापारमहिमनि तृतीयस्य भोगकृत्व व्यापारस्य महिम्ना निगीर्णयोः रजस्तमसोः उद्रिक्तसत्त्वजनितेन निजचित्स्वभावनिर्वृतिविश्रान्ति लक्षणेन साक्षात्कारेण विषयीकृतो भावनोपनीतो साधारणात्मा रत्यादिःस्थायी रसः । सोऽयं भोगो विभावादिविषयसंवलनाद्ब्रह्मास्वादसविधवर्तीत्युच्यते ।

एवं च त्र्यंशाः काव्यस्य "अभिधा भावना चैव तद्भोगीकृतिरेव च" इति । मतेऽस्मिन् भावकत्वव्यापार एवातिरिक्तः स्वीक्रियते, भोगस्तु व्यक्तिरेव, भोगकृत्वं च व्यञ्जनाया विशिष्टम् । अन्यत्सर्वं तु मम्मटादिवदेव इति ।

८—नव्यास्तु 'विभावानुभावव्यभिचारिणां' 'संयोगाद्' भावनाविशेषरूपाद्दोषाद् 'रसस्य' अनिर्वचनीयदुष्यन्तरत्याद्यात्मनो 'निष्पत्ति'—

स्त्यमितिरितिसूत्राशयं पश्यन्ति। एते हि अनिर्वचनीयख्यातिं स्वीकुर्वते। एतन्मतस्यायं सारः—

यथा अज्ञानावच्छिन्ने शुक्तिकाशकले समुत्पद्यमानोऽनिर्वचनीयो रजतखण्डः साक्षिभास्यो भवति, एवं काव्ये कविना, नाट्ये च नटेन प्रकाशितेषु विभावादिषु व्यञ्जनाव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायां तदनु सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मनि समुत्पद्यमानो अनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः। अयं च कार्यो दोषविशेषस्य, नाश्यश्च तन्नाशस्य, स्वोत्तरभाविना लोकोत्तराह्लादेन भेदाग्रहात् सुखपदव्यपदेश्यो भवति, स्वपूर्वोपस्थितेन च रत्यादिना भेदाग्रहात् तद्वृत्तित्वेन एकत्वाध्यवसानाद्वा व्यङ्ग्यो वर्णनीयश्चोच्यते। अवच्छादकं दुष्यन्तत्वमप्यनिर्वचनीयमेव—अवच्छादकत्वं च रत्यादिविशिष्टबोधे विशेष्यतावच्छेदकत्वम्।

एतेन तादात्म्येन रसप्रतीतौ अनास्वाद्यत्वम्, अनात्मसम्बन्धिभिः शकुन्तलादिभिरात्मगतत्वेन तु प्रत्ययो दुर्घटः, स्वस्मिन् दुष्यन्ताद्यभेदबुद्धिस्तु बाधबुद्धिपराहतेत्यादिकं पूर्वोक्तं दूषणमप्यपास्तं भवति।

यद्यपि विभावादीनां सामाजिकान् प्रति साधारणीकरणं प्राचीनैरुक्तम्, तदपि काव्येन शकुन्तलात्वादिप्रकारकबोधजनकैः शकुन्तलादिशब्दैः प्रतिपाद्यमानेषु नायिकादिरूपेषु पदार्थेषु दोषविशेषकल्पनं विना दुरुपपादम्—एवञ्च अवश्यकल्पनीये दोषविशेषे तेनैव स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरपि सूपपादैव इति।

स्यादेतत्—रतेर्हि सुखजनकतया दुष्यन्तादाविव सहृदयेपि आस्तां नाम सुखकरत्वम्, करुणरसादिषु तु स्थायिनः शोकादेर्दुःखजनकतया प्रसिद्धस्य कथमिव सहृदयाह्लादकत्वम्—प्रत्युत नायक इव सहृदयेपि दुःखजननस्यैव औचित्यात्। न च सत्यस्यैव शोकादेर्दुःखजनकत्वं प्रतिनियतम्, न पुनः कल्पितस्यापीति नायकादीनामेव दुःखम्, न तु सहृदयस्येति शक्यं वक्तुम्, रज्जुसर्पादीनामपि भयकम्पाद्युत्पाद-

कत्वप्रसङ्गात्, सहृदये रतेरपि कल्पितत्वेन सुखजनकतानुपपत्तेश्चेति चेद् अवधीयताम्। शृङ्गारप्रधानकाव्येभ्य इव यदि केवलाह्लाद एव अत्रापि सहृदयहृदयप्रमाणकस्तदा कार्यानुरोधेन कारणस्य कल्पनीयत्वात् लोकोत्तरकाव्यव्यापारस्यैव आह्लादजनकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम्। अथ यदि आह्लाद इव दुःखमपि प्रमाणसिद्धं तदा प्रतिबन्धकत्वं न कल्पनीयम्, स्वस्वकारणवशाच्चोभयमपि भविष्यति। अथ तादृशे काव्ये, कवीनां कर्तुं म, सहृदयानाञ्च श्रोतुं कथं प्रवृत्तिः? अनिष्टसाधनत्वेन निवृत्तेरुचितत्वाद् इति चेन्न, इष्टस्याधिक्याद् अनिष्टस्य च न्यूनत्वात्प्रवृत्तेरुपपत्तेः। केवलाह्लादवादिनान्तु प्रवृत्तिरप्रत्यूहैव—अश्रुपातादयश्च तत्तदानन्दानुभवस्वाभाव्यात्, न तु दुःखात्। अत एव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यन्ते—न हि तत्र जातुचिद् दुःखानुभवोऽस्ति।

न च करुणरसादौ स्वात्मनि शोकादिमद्दशरथादितादात्म्यारोपेऽपि यद्याह्लादस्तर्हि स्वप्नादौ सन्निपातादावपि च स स्यात्, आनुभविकं च तत्र केवलं दुःखमिति इहापि तदेव युक्तमिति वाच्यम्—अयं हि लोकोत्तरस्य काव्यव्यापारस्यैव महिमा यत्प्रयोज्या अरमणीया अपि पदार्थाः शोकादयः आह्लादमलौकिकं जनयन्ति। विलक्षणो हि कमनीयः काव्यव्यापारज आस्वादः प्रमाणान्तरजादनुभवात्। जन्यत्वञ्च स्वजन्यभावनाजन्यरत्यादिविषयकत्वम्—तेन रसास्वादस्य काव्यव्यापाराजन्यत्वेऽपि न क्षतिः। शकुन्तलादावगम्यात्वज्ञानोत्पादस्तु स्वात्मनि दुष्यन्ताभेदबुद्ध्या प्रतिबध्यते—इति।

९—भट्टलोल्लटप्रभृतयस्तु विभावादीनां सम्बन्धाद् रसस्य निष्पत्तिरारोप इति पूर्वोक्तसूत्रस्यार्थमाहुः। इदमेषामाकूतम्—यद् व्यञ्जनाव्यापारस्य अनिर्वचनीयख्यातेश्चानभ्युपगमेऽपि प्रागुक्तदोषमहिम्ना स्वात्मनि दुष्यन्तादितादात्म्यावगाही शकुन्तलादिविषयकरत्यादिमदभेदबोधो मानसः काव्यार्थभावनाजन्मा विलक्षणविषयताशाली रसः।

स्वप्नादिस्तु बोधो नकाव्यार्थभावनाजन्मा इति न रसः—तेन तत्र न तादृशाह्लादापत्तिः।

नचैवमपि स्वस्मिन् अविद्यमानस्य रत्यादेरनुभवः कथं नाम स्यात् इति वाच्यम्। नह्ययं लौकिकसाक्षात्कारो रत्यादेः, येनावश्यं विषयसत्ता-पेक्षणीयः स्यात्-अपि तु भ्रमः । आस्वादनस्य रसविषयकत्वव्यवहारस्तु रत्यादिविषयकत्वालम्बन. । एतेन स्वात्मनि दुष्यन्तत्वधर्मितावच्छेदकशकुन्तलादिविषयकरतिवैशिष्ट्यावगाही,—स्वात्मत्वविशिष्टे शकुन्तलादिविषयकरतिविशिष्टदुष्यन्ततादात्म्यावगाही, स्वात्मत्वविशिष्टे दुष्यन्तशकुन्तलादिविषयकरत्योर्वैशिष्ट्यावगाही वा त्रिविधोऽपि बोधो रसपदार्थतयाऽभ्युपेयः ।

१० तत्र विशेषणीभूताया रतेः शब्दादप्रतीतत्वाद् व्यञ्जनायाश्च अस्वीकाराद् आदौ चेष्टादिलिङ्गकमनुमानम् विशेषणज्ञानार्थमभ्युपगन्तव्यम् । दुष्यन्तादिगत एव रसो रत्यादिः कमनीयविभावाद्यभिनयप्रदर्शनकोविदे नटे समारोप्य साक्षात्क्रियते-इतिचित् ।

११ श्रीशङ्कुकप्रभृतयस्तु—मतेऽस्मिन् साक्षात्कारो 'दुष्यन्तोऽयं शकुन्तलादिविषयकरतिमानित्यादिः प्रागवद् धर्म्यंशे लौकिकः—आरोप्यांशे त्वलौकिकः—दुष्यन्तादिगतो रत्यादिर्नटे पक्षे दुष्यन्तत्वेन गृहीते कृत्रिमैरप्यकृत्रिमतया गृहीतर्विभावादिभिर्भिन्नेपि विषये अनुमितिसामग्र्या बलवत्त्वादनुमीयमानो रस इत्याहुः ।

एतेषां मते 'विभावादिभिः' कृत्रिमैरप्यकृत्रिमतया गृहीतः 'संयोगाद्' अनुमानाद् 'रसस्य' रत्यादेः 'निष्पत्तिः' अनुमानम् इति सूत्रार्थो भवति—अत्र च 'नटे' पक्षे इति वाक्यशेषो भवति ।

अत्र मतेषु प्रत्यक्षमेव ज्ञानं चमत्कारकं भवति, नानुमानम्, किं च सत्यनुमाने 'रसं साक्षात्करोमी'त्यनुव्यवसायानुपपत्तिरिति, नटे बाधज्ञानेपि उक्तानुमितिविरहेपि च आस्वादोदयो दृश्यते—इत्यादिकमरुचिबीजं क्वचित् । क्वचित्तु न खलु रतिरेव रसः, नापि रामादौ रसः, रामादौ रतिः, सामाजिकेषु रस इति स्थितेः, तस्मात् मुख्यया वृत्त्या रामादौ रसस्वीकृतिरेवारुचिबीजम् । क्वचिच्च व्यापारान्तरकल्पनमेव गौरवम्, क्वचिच्चान्यदप्येवंजातीयकमरुचिनिमित्तम् । तस्मात् काव्यप्रकाशकारिकया प्रकाशितम् अलंकार-

शास्त्रहृदयज्ञस्य अभिनवगुप्तपादाचार्यस्य मतमेव सकलालंकारिकमौलिमालालालितम् । एवमत्र रसविषये एकादश विकल्पाः प्रदर्शिताः, विकल्पान्तराणि तु प्राय एतेषामेव रूपान्तराणि, विवादबहुलानि, न च हृदयंगमानि इत्यतिविस्तृतिभयादुपेक्ष्यन्ते ।

यद्यप्यत्र प्रपञ्चे नानाजातीयाभिःशेमुषीभिरनेकधाऽध्यवसितो रसः, तथापि तस्य परमाह्लादजनकतायां न कस्यापि विसंवादः, अवान्तरप्रकारे च नास्ति सर्वथा संवादोऽपि । इदमेव पुष्कलं प्रमाणं रसस्य सत्त्वे, आनन्दस्वरूपत्वे, अनिर्वचनीयत्वे च । एतेनैव चास्य आत्मस्वरूपता साधु साधिता भवति—आत्मनश्च वाङ्मनसातिगोचरत्वम् अनिर्वचनीयत्वम् आनन्दघनत्वञ्च " न तत्र मनो गच्छति न वाग् गच्छति" 'एष एव ह्यात्मा आनन्दमयः" इत्यादिवेदान्तवाक्यैरुद्घोषितमेव ।

सोऽयं रसो नाभिधयाभिधेयः । स्वशब्देन शृङ्गारादिशब्देन च उच्यमानः प्रत्युत दोषाय । नापि लक्षणया लक्षणीयः । न चापि तात्पर्याख्यया वृत्त्या विनिवेदनीयः, किन्तु अलङ्कारशास्त्रप्राणया, चमत्कारजीवातुभूतया व्यञ्जनावृत्त्या प्रकाशितो भवति । इयमेव (व्यञ्जनैव) रसाङ्गभूतो व्यापार इत्युच्यते । एतद्विशिष्टश्च शब्दः काव्यमित्याख्यायते ।

इयञ्च सकलार्यमौलिमालायमानं रसं भासयन्ती वस्त्वलङ्कारादिकमपि द्योतयति ।

एतावांस्तु विशेषः—यद् अलङ्कारादयःशक्त्यन्तरेणापि शक्याः प्रतिपादयितुम्—रसं पुनरेतां महाशक्तिमन्तरेण न काप्यन्या शक्ता सम्पादयितुम् । दोषाभावगुणालङ्काररीतिप्रभृतयस्तु रसस्य उपस्कारकाः, राज्ञ इव पार्षदाः। यथा च राज्ञो विरहेऽपि केवलाः समुदिताश्च तस्य पारिषद्याः प्रभवन्ते जनानावर्जयितुम्, प्रभावञ्च सम्पादयितुम् । एवं नीरसेऽपि काव्ये सम्भूय वर्तमानाः गुणालंकारादयः सहृदयानावर्जयन्ति, चमत्कारञ्च जनयन्ति रसेन सह वर्तमानास्तु तस्योत्कर्षातिशयमापादयन्ति। एतेषु दोषाभाव एव सर्वप्रधानः । दोषो हि अनौचित्यात् जायमानो रसमपकर्षयन् कदाचित् समूलमप्युन्मूलयति, अतस्तदभावोऽवश्यमेषणीयः, सर्वात्मना च यतनीयं

कविना तदुपस्करणे । इदमेव प्रथमं सोपानं सरसकविलासस्य सत्ये । अनौचित्यपरिहारेणैव हि औचित्यं सम्यक् सम्पद्यते, शब्दार्थयोरौचित्यमेव च समर्थं स्वात्मनि चमत्कारमाधातुम्, रसञ्च प्रकाशयितुम् । यदुक्तमभियुक्तैः—

अनौचित्याद् ऋते नान्यद् रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा । इति ।

उद्दिष्टप्रतीतिप्रतिबन्धकत्वं हि दोषत्वम् । उद्दिष्टा च प्रतीतिः चमत्कारवती, अविलम्बिता, अनपकृष्टा च । तत्र कश्चिद्दोषश्च्युतसंस्कारप्रभृतिः अर्थानुपस्थापकतया चमत्कारमेव दूरीकरोति । कश्चिच्च नेयार्थादिर्विलम्बेन उपस्थापयति । कश्चिच्च श्रुतिकटुप्रभृतिरपकृष्य उपस्थापयति । प्रतिबन्धकता पुनः सर्वत्र समानैव । तत्र काव्ये सर्वथा हेयस्य नित्यदोषस्याभावो ऽवश्यमेषणीयः, अन्येपि दोषा नोपस्थातुमनुमन्यन्ते, किन्तु यथाशक्ति तेषामप्यपाकरणाय यतनीयमेव कविना, तथापि क्वचिदनधिकं समुन्मिषत्स्वपि तेषु काव्यत्वं भवत्येव ।

इदमेवाभिप्रेत्य 'नित्यदोष' पदं विहाय सामान्येन " अदोषौ " इति पदं नित्यदोषावश्यपरिहाराभिप्रायेण शब्दार्थयोर्विशेषणं प्रायुङ्क्त काव्यलक्षणे वाग्देवतावतारः श्रीमान् मम्मटाचार्यः । (तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति) अत्र साहित्यदर्पणकर्तुराक्षेपाणां निःसारता तु परस्ताद् विशदीकरिष्यते ।

रसो हि विश्रान्तिधामतया सर्वप्रधानं फलम् । अत एव सकलप्रयोजनमौलिभूतत्वेन अस्याख्यानं कृतं प्रामाणिकैः । फले च न कश्चिद् व्यापारः कर्त्रा करणीयो भवति । यदाहुस्तत्ववैशारद्यां श्रीवाचस्पतिमिश्राः- 'साधनगोचरो हि कर्तुर्व्यापारो न फलगोचरः" इति । न खलु घटं चिकीर्षुर्घटे किंचित्कार्यं करोति-अविद्यमानो हि तदानीं स भवति-दण्डादिव्यापारेण समुत्पन्ने तु घटे न किंचित्करणीयमवशिष्यते ।

एवं सरसं काव्यं चिकीर्षोः कवेरपि संरम्भो नांशतोपि रसं विषयीकरोति, अपितु तत्साधनमेव । साधनञ्च दोषाणां परिहारः, गुणानां निबन्धनम्, अलङ्कारादिसम्बन्धश्चेति । एवञ्च कविना पूर्वं तादृशः परिमार्जितोऽर्थस्तदभिधायकश्च तादृशः परिष्कृतः शब्दसन्दोहः समुपनिबन्धनीयो भवति,

यस्मिन्निबद्धे न खलु दोषा उद्यन्ति, गुणाश्च प्रगुणीभवन्ति अलंकाराश्च स्फुरन्ति । शब्दार्थौ च तथा अनुन्नतस्कन्धतया आत्मानमर्पयतो, यथा सचेतसां चेतांसि न तयोरेव आवर्जितानि परिश्राम्यन्ति ।

यदुक्तं भरतेन—

> वेक्रीयितप्रभृतिभिर्विकटैश्च शब्दै-
> र्युक्ता न भान्ति ललिता भरतप्रयोगाः ।
> यज्ञक्रियेव शरदम्बरधैर्धृताक्षै-
> र्वन्ध्या द्विजैरिव कमण्डलुदण्डहस्तैः । इति ।

ध्वनिकृता च—

> ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।
> शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः । इति

एवं च सरसं चेत् काव्यं गुणालंकारादिभिरेतरवश्यमुत्कर्षातिशयो विद्योतेत । नीरसेपि च चमत्कारजनकतया काव्यपदव्यपदेश्यत्वं स्यात् ।

यतः-१ सरसं स्फुटालङ्कारसहितम् ,
२ सरसम् अस्फुटालङ्कारसहितम्
३ सरसम् अलङ्कारशून्यम्
४ नीरसं स्फुटालंकारसहितम्
५ नीरसम् अस्फुटालंकारसहितमिति

पञ्चविधमपि काव्यं स्वीक्रियते ।

अथ किं नाम काव्यत्वमितिचेत् त्रिविधः-शब्द इतिप्रागावेदितमेव । तत्र लौकिकवैदिकभेदाभ्यां द्विधा भिन्नं वाङ्मयम् , तत्र छन्दोब्राह्मणप्रभृतीनि तदुपजीवकाश्च निबन्धाः पूर्वोक्तलक्षणानुसारेण वैदिकं वाङ्मयम् । "इतिहासपुराणाभ्यां वेदं समुपबृंहयेदि" त्यादिवचनैरितिहासपुराणादीनां वेदोपबृंहकत्वेन तान्यपि वैदिकवाङ्मयस्य पुच्छभूतान्येव । लौकिकेपि वाङ्मये काव्यनाटकादौ इतिवृत्तकथानिबन्धे पुरावृत्तनिरूपणे स्वस्वरूपनिवेदने च इतिहासपुराणादीनामुपकारकतया लौकिकान्यपि तानीति तु न विस्मर्तव्यम्। एवं दर्शनादीनि मनननिदिध्यासनादिशास्त्राण्यपि ।

एवञ्च छन्दोव्याकरणप्रभृति शुद्धं वैदिकं वाङ्मयम्, इतिहासपुराणदर्शनादिकन्तु लोकवेदयोः साधारण्येन उपकारकम्—इत्युभयसाधारणम्। तदतिरिक्तश्च कान्तासम्मितो रसादिप्रवणः प्राक् प्रतिपादितः शब्दकलापः शुद्धं लौकिकं वाङ्मयं काव्यपदव्यपदेश्यं भवति।

केचित्तु आङ्ग्लस्य लिट्रेचर (Literature) पदस्य पर्याये साहित्यशब्दं प्रयुञ्जते, तन्मतेनेदं द्विविधं "साहित्यम्"। तृतीयञ्च उभयोपकारकं "साहित्यम्"।

उभयविधमपि चेदं लौकिकं वैदिकं च साहित्यं प्राणभृतां कल्याणाय प्रवर्तितम्। वेदादिकं हि यज्ञाद्यनुष्ठानेन परिमार्जितान्तःकरणानां प्राचीनधर्मसंस्कारवतां निदिध्यासनादिना समाधिभावनया ब्रह्मसाक्षात्कारपुरस्सरं परमानन्दसन्दोहं समर्पयति। लौकिकमपि च वाङ्मयं श्रीमद्रामायणादिकं प्राचीनवासनावतां सचेतसां पुनः पुनरनुसन्धानात्मनो भावनाविशेषस्य बलेन ब्रह्मास्वादसहोदरं रसं कथमास्वादयतीति तु पर्याप्तमावेदितमधस्तात्। सुखं वा आनन्दो वा वृत्तीनामन्तर्मुखतयैव। अन्तर्मुखता च वृत्तीनां समाधौ रसास्वादे च समानैव

एतावांस्तु विशेषो यत्कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशे अमोघमस्त्रभूतं सत्काव्यं रसमास्वादयत् सन्मार्गानुष्ठापनायापि प्रभवति। यथा च व्याकरणादीनि वेदस्याङ्गानि, एवं लोकस्यापि। न केवलं व्याकरणादीन्येव, लौकिकवस्तुजातपरिशीलनं, कलासु कौशलं शास्त्रविचक्षणत्वादिकञ्च अत्र सर्वमेवाऽङ्गभूतम्। यदाहुः—

> "न स शब्दो न तद् वाच्यं न स न्यायो न सा कला।
> जायते यन्न काव्याङ्गमहो भारो महान् कवेः" इति।

इदं च काव्यं पुरुषाकारतया साङ्गोपाङ्गं निरूप्यते। यदुक्तम् "काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्, इति।

सो ऽयं वेदपुरुष इव काव्यपुरुषश्चतुर्वर्गसाधनाय यथा प्रभवति, तथा प्रतिपादितं साहित्यदर्पणारम्भे विश्वनाथेन । यथा च जैमिनीयं शास्त्रशास्त्रं वेदवाक्यानि मीमांसमानमास्ते, एवमलङ्कारशास्त्रं लौकिकवाक्यानि मीमांसते । यथा च वेदेषु गायत्र्यादीनामृषभादिस्वरैरेवोच्चारणीयत्वं प्रतिनियतम्, एवं लोकपदव्यपदेश्ये ऽस्मिन्नपि रसेषु स्वरनियमो भवति । दिङ्मात्रं यथा भरतवाक्येषु—

'हास्यशृङ्गारयोः कार्यौ स्वरौ मध्यमपञ्चमौ ।
षड्जर्षभौ तथा चैव वीररौद्राद्भुतेषु च ।
गान्धारश्च निषादश्च कर्तव्यौ करुणे रसे ।
धैवतश्चैव कर्तव्यो बीभत्से सभयानके' । इति

न केवलं स्वरा एव, अपि तु यथा यागाद्यनुष्ठाने क्रियासु स्वरपात्रप्रकृत्यादिनियमो यथा च तत्र स्वल्पेपि स्खलिते विगुणं कर्म भवति, तथैव अत्रापि स्वराः, स्थानानि, वर्णाः, अङ्गानि विरामप्रयत्नाः, छन्दांसि, पात्राणि, प्रकृतयः , आतोद्यविन्यासाः, काकवः, अलङ्कारादिकञ्च तथा नियमितम्, यथा उत्तरोत्तरं विचार्यमाणम् आचार्याणां प्रसन्नगम्भीराम्भोनिधिप्रख्यं सर्वदर्शि च ज्ञानमाहात्म्यं स्फुटमवगमयति । तत्र स्वरा उक्ता एव , स्थानानि तु लोकवेदसाधारणानि उरः,कण्ठः, शिरः—इति त्रीण्येव । यदुच्यते—

'शारीर्यामथ वीणायां त्रिभ्यः स्थानेभ्य एव तु ।
उरसः शिरसः कण्ठात् स्वरः काकुः प्रवर्तते ।
आभाषणं च दूरस्थे शिरसा सम्प्रयोजयेत् ।
नातिदूरे च कण्ठेन उरसा तु समीपतः । इति

वर्णास्तु उदात्तानुदात्तस्वरितास्त्रयो वेदप्रसिद्धाः । लोके तु कम्पिताख्यश्चतुर्थोपि स्वरो भवति ।

यथा च वेदेषु स्खलिते सञ्जाते 'य उदात्ते कर्तव्ये अनुदात्तं करोति, खण्डिकोपाध्यायस्तस्मै चपेटां ददाति' एवं लोकेपि क्रमभङ्गो न मर्षणीयो भवति । तथा चोक्तं मुनिना-

"उदात्तश्चानुदात्तश्च स्वरितः कम्पितस्तथा
वर्णाश्चत्वार एव स्युः पाठ्ययोगे तपोधनाः ।
तत्र हास्यशृङ्गारयोः स्वरितोदात्तैः, वीररौद्राद्भुतेषु उदात्तकम्पितैः, करुणवात्सल्यभयानकेषु अनुदात्तस्वरितकम्पितैर्वर्णैः पाठ्यमुपपादयेत्" इति। अङ्गानि तु विच्छेदोपसर्पणादीनि आकरप्रसिद्धानि तत एवावसेयानि ।

विरामप्रयत्नो यथा—

"विरामेषु प्रयत्नस्तु नित्यं कार्यः प्रयोक्तृभिः ।
कस्माद् ? अभिनयो ह्यर्थे अर्थापेक्षी यतः स्थितः ।
यत्र व्यक्तावुभौ हस्तौ तत्र दृष्टिसमन्वितः ।
वाचिकाभिनयः कार्यो विरामैरर्थदर्शकैः ।
प्रायो वीरे च रौद्रे च करौ प्रहरणाकुलौ ।
बीभत्से कुत्सितत्वाच्च भवत; कुञ्चितौ करौ ॥
हास्ये चोद्देशमात्रेण, करुणे च प्रलम्बितौ ।
अद्भुते विस्मयाविष्टौ स्तब्धौ कार्यौ भयानके ॥
एवमादिषु चान्येषु प्रविचारेषु हस्तयोः ।
अङ्गविरामाभ्यां साध्यते ह्यर्थनिश्चयः" । इति ।

अद्यतनीं व्याख्यानकलां अभिनयकलां च पाश्चात्यपण्डितप्रणीतपक्ष्मेवेति मन्वानैः गौराङ्गगुरूणां गतानुगतिकैः बाबूसाम्प्रदायिकैः अनेकसमासाहस्रीमतिवृत्य वर्तमानेष्वेतेष्वपि पदेषु निवेशनीये कृपया विवेकदृशौ ।

छन्दसामपि नियमो ऽत्र, यथा वेदे ।

'जगत्यातिजगत्या वा संकृत्या, त्रीणि योजयेत् ।
तथैव युद्धसम्फेटौ प्रकृत्या सम्प्रयोजितौ ।
करुणे शक्करी चैव तथा चातिधृतिः स्मृता ।
यद्वीरे कीर्त्यते छन्दस्तद्रौद्रे सम्प्रयोजयेत्' । इति ।

पाठ्यालङ्काराश्च क्षेमेन्द्रकविकृतसन्दर्भेषु सविस्तरं निरूपिताः । इदमेव लौकिकवाङ्मये औचित्यविचारकरं शास्त्रम् अलङ्कारशास्त्रं वा साहित्यशास्त्रं वा अभिधीयते ।

अनौचित्याद् ऋते नान्यद्रसभङ्गं प्रयोजयतीत्यावेदितं पुरस्तात्। तत् सरससन्दर्भनिबन्धनाय तज्ज्ञानाय च कवीनां सहृदयानां च अन्येषाञ्च लोकनैपुण्यमीहमानानाम् औचित्यज्ञानसमर्पकस्य अस्य शास्त्रस्य ज्ञानं कियदिव आवश्यकमिति नेदानीं बहु वक्तव्यमपेक्षते।

इदं च प्राधान्येन वाक्यानि मीमांसमानं जैमिनीयस्थानीयम्। यथा जैमिनीयमीश्वरप्रकाशितं वेदं विचारयति, एवमिदं कवीश्वरप्रकाशितं काव्यम्। एतावाँस्तु विशेषो—यत् तद्वेदार्थं मीमांसमानमन्ततो भगवन्तं विश्वविधातारमपि निगिलति। इदन्तु गुणदोषादिमात्रविवेचकं न तत्कर्त्रादिसत्तामपलपतीति।

विचारेषु तु अत्र प्रायः सर्वेषामेव दर्शनानां समयाः समुपतिष्ठन्ते, इति परिज्ञातसकलशास्त्रप्रमेयाणामेव अत्र शास्त्रेऽधिकारः साधीयानिति विदितमेव सुधियाम्।

यद्यपि शब्दार्थविनाकृतानां रसगुणदोषभावरीत्यलङ्कारादीनां नास्त्यवस्थानसंभवस्तथापि 'प्रधानेन हि व्यपदेशा भवन्ती' ति न्यायात् क्वचिदेव कस्यचिदेव प्राधान्यमित्यवोचाम। एवञ्च प्राधान्यानुरोधेन कवयः काव्यानि च अलङ्कारशास्त्रानुसारम् पञ्चसु भागेषु शक्यान्यवस्थापयितुम्। तथाहि—

१ शब्दप्रधानम् २ अर्थप्रधानम् ३ शब्दार्थोभयप्रधानम् ४—रसादिप्रधानम् ५ अलङ्कारादिप्रधानञ्चेति काव्यभेदाः। कवयोऽपि तत्र तत्र लब्धपरिपोषास्तथैव व्यपदेश्याः। तेषु यत्र अर्थाद्यपेक्षया अनुरूपशब्दसंयोजनमेव अतितरां कविसंरम्भगोचरस्तद् यमकानुप्रासप्रधानम्, खड्गमुसलादिबन्धरूपञ्च, शब्दप्रधानं काव्यम्। अत्र चमत्कारो विचित्रशब्दसंघटनानुरूपकविप्रतिभामात्रनिरूपितः।

उदाहरणं यथा—

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा—
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निका ह्नाय वः।
भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम—
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्। इति।

बन्धनैपुण्यन्तु रुद्रटविरचिते काव्यालङ्कारे सर्वातिशायितया दृश्यते । तस्य खलु कवेः सर्वाः शक्तयो बन्धनिर्बन्ध एव परिश्रान्ताः । अनेन हि अतिविस्मयकरः खड्गमुसलधनुःशरशूलादिभिरष्टभिर्बन्धैः सम्मेलितै-र्महाचक्रबन्ध निष्पादितः ।

एवंविधेषु काव्येषु कवेः शब्दैकपरतन्त्रतया, अर्थोपस्थितावन्त-रायापातः स्वभावसिद्ध एव । अत एव एतादृशकाव्यानामधमत्वम्, अप्रौ-ढार्थत्वे तु पामरश्लाघ्यत्वं चोक्तं प्रामाणिकैः । आहुश्च चित्रमीमांसायाम-प्पय्यदीक्षिता अपि 'शब्दचित्रस्य प्रायो नीरसत्वान्न तदाद्रियन्ते कवयः' इति । युधिष्ठिरविजयादिकश्च सन्दर्भो यमकादिप्रधानः ।

यत्र च कविप्रतिभापरिष्कृतस्वरूपो गभीरतया विचित्रतया गुणी-भूतव्यङ्ग्यतया वा अर्थः प्राधान्येन आह्लादयति सचेतसां चेतांसि, तद् द्वितीयम् अर्थप्रधानं काव्यम्—यथा महाकविश्रीभारविप्रभृतीनां निबन्धाः ।

'स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात् पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य पूर्वस्थितो धूम इवाबभासे' । इत्यादीनि चित्रार्थानि पद्यानि—

'राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु ।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥'

इत्यादीनि च गुणीभूतव्यङ्ग्यानि पद्यान्युदाहरणानि । अत्रान्तिमे पद्ये 'जानकीकुशलावेदनेन राघवः शिशिरीकृतः' इति व्यङ्ग्यमपि आकस्मिककपिकर्तृकहनूमद्विषयककोपोपपादकतया, दुर्दैववशतो दास्य-मनुभवद्राजकलत्रमिव कामपि कमनीयतामावहति ।

यत्र तु शब्दार्थयोरन्यतरन्नोन्नतस्कन्धतया आत्मानमर्पयति, किन्तु सममेव उभयोः प्राधान्येन वैचित्र्यम्, तदुभयप्रधानम् । यथा—

"उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पन्धयानाम्
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम् ।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
संघातः कोपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत्" इति ।

अत्र वृत्त्यनुप्रासप्राचुर्य्याद् ओजोगुणप्रकाशकत्वाच्च शब्दस्य, प्रसादगुणयोगादनन्तरमेवाधिगतस्य रूपकस्य हेत्वलङ्कारस्य वा वाच्यस्य चमत्कृत्योस्तुल्यमेव प्राधान्यम् ।

यथा वा—

'वराहः कल्याणं वितरतु स वः कल्पविरमे
विनिर्धुन्वन्नौदन्वतमुदकमुर्वीमुदवहत् ।
खुराघातत्रुट्यत्कुलशिखरिकूटप्रविलुठ-
च्छिलाकोटिस्फोटस्फुटघटितमाङ्गल्यपटहः' इति ।

अत्रापि वृत्त्यनुप्रासस्य ओजोगुणस्य च शब्दे, प्रसादगुणमहिम्ना सद्यः समधिगतेन रूपकेण च अर्थे, चमत्कृत्योस्तुल्यं प्राधान्यम् । न चात्र कविनिष्ठस्यादिवराहविषयकस्य रतेर्भावस्य प्राधान्यादिदमुत्तमं काव्यं नात्र परिगणनमर्हतीति वाच्यम्—, व्यङ्ग्यस्यापि रतेर्भावस्य आशीर्वादाङ्गत्वेन तस्य च 'कल्याणं वितरतु' इति पदाभिधेयत्वेन वाच्यार्थप्राधान्याद्रतेर्भावस्य एव वाक्यार्थे परिसमाप्तिरिति श्रीमतां चित्रमीमांसाकृतामाशयात् ।

रस, भाव, तदाभासादिप्रधानं च काव्यं रसप्रधानमित्युच्यते, 'रस्यते इति रसः' इति व्युत्पत्तेः सर्वेषामपि रसपदेन ग्रहणात् ।

एतत्प्रधान्याय यद्यपि सर्वैरेव कविभिर्यथाशक्ति प्रयतितम्, तथापि कस्यचिदेव सुकृतातिशयपरिष्कृतात्मनो वचसि यथायथं प्रसरोऽस्य दृश्यते । वस्तुतस्तु रसमयभणितीनामक्षय्यौ निधी कविताकल्पद्रुमौ भगवन्तौ वल्मीकजन्मपुलिनजन्मानौ एव अत्रार्थे मार्गदर्शिनौ ।

अर्वाचीनेषु पुनः—

यथारसस्यन्दनबन्धबन्धः श्रीकालिदासो मुकुटं कवीनाम् ।
तथा न कस्यापि ललाटलेखा व्यलेखि शुद्धा विधिना विधाय । १
समासहस्रद्वितयीमतीत्य जातेषु नानाकविपुङ्गवेषु ॥
कश्चिन्निबन्धावलिबन्धकेषु माद्यात्यतिक्रामति तद्यशोऽधिमम् २

सरसकाव्यव्यापारेण हि अन्तःकरणे द्रुति, दीप्ति, विक्षोभ, विस्ताराख्याश्चतस्रो दशाः सम्पद्यन्त इति तत्काव्यमपि चतुर्विधत्वं भजते । तत्र द्रुतिः अनुकूलेऽर्थे प्रगुणीभूतस्य, निर्गलितप्रायस्य चेतस आर्द्र-

प्रायत्वम्। सा च शृङ्गारे विप्रलम्भे वात्सल्ये करुणे शान्ते च रसे आकर-प्रसिद्धेभ्यः स्वस्वकारणेभ्यो यथोत्तरमुत्कर्षं श्रयते।

दीप्तिस्तु उत्साहजनकं सहृदयहृदयानां दीप्तप्रायत्वरूपमोजः। तद्वीरे रौद्रे च उपचीयते। विस्तारो निगदव्याख्यातो हास्यादौ। विक्षोभश्च भयानके बीभत्से च भूयस्त्वं भजते।

अत्रापि वैदर्भी रीतिः प्रसादो गुणः मधुरा च रचना यथा कविकुलगुरोः श्रीकालिदासस्य वचांसि संश्रित्य द्रुतिकारणतां प्रपद्यन्ते, तथा नान्येषु। एष हि महाकविः प्रायः सर्वानपि रसान् वर्णयन्नपि करुणे एव परां काष्ठां प्रतिष्ठापयति। भाविसमागमप्रत्याशया रतेरनुन्मूलनमात्रेण भिन्नो विप्रलम्भोपि करुणान्नातीव भिद्यते। तस्मादयमपि चास्य महोन्नतः। समान-साधनतया च शृङ्गारोपि न दवीयानेतद्रसात्। परं स्वयमप्येष महाकविः स्वकीये करुणरसवर्णने निगूढमभिमन्यमान इव। धीरोदात्ततया च स्फुट-मावेदयितुमशक्तोपि व्यङ्ग्येन सहृदयहृदयान्यावर्जयितुं सुनिपुणं प्रायतत। नाविदितमिदं रसिकानां यत्कालिदासकाव्येषु रघुवंशस्य पारेगिरां महिमा। तत्रापि चतुर्दश. सर्गः करुणरसनदीनिर्झरायमाणः सर्वातिशायी। चतुर्दशा-दिषु त्रिषु सर्गेषु महाकविना अनेन कस्को हृदयोद्गारः के के च भावा आविष्कृता इति न शक्यं वचनैराख्यातुम्। प्रतिपद्यं प्रतिपदं च विजृम्भमाणानामेषां परिगणनमपि दुःशकं कर्तुम्। चतुर्दशे सर्गे सीतापरित्यागं चिकीर्षुः श्रीरामो भ्रातॄणां निजाज्ञाप्रत्यादेशमाशङ्कमानस्तानाचष्टे—यद् यदि भवन्तो मां जीवन्तमिच्छन्ति, तदा ममायं निश्चयो न प्रत्याख्येयः। कविरप्यत्र अवसर-मिमं करुणरससरित्प्रसरस्य उद्गमस्थानमिव पश्यन् रसपूरे रसिकान् निमज्जयितुममोघमस्त्रमिव विन्दन् ग्राव्णामपि द्रावणमीषत्करं मन्यमानो विकत्थनाद् बिभ्यन् स्फुटमनाचक्षाणोपि चतुर्दशसर्गस्यावश्यपठनीयतारूपं स्वकीयमाशयं विशदीचकार।

तच्चेदं पद्यम्—

> स एष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः।
>
> यद्यर्थिता निर्हृतवाच्यशल्यान् प्राणान् मया धारयितुं चिरं वः।

अत्र पद्ये 'अयि करुणार्द्रहृदयाः सहृदयाः' यदि भवन्तो वाञ्छन्ति, यदहं (कालिदासो) निर्हृतवाच्यशल्यः सन् यशःशरीरेण चिरं प्राणान्

धारयेयं तदा भवद्भिर्मम स एष (चतुर्दशः) सर्गः न प्रतिषेधनीयः—अव-श्यं पठनीयः' इत्ययमाशयो निपुणं निरीक्षितो मर्तयतीव विवेचकानां चेतः।

रघुवंशविमर्शकृता तु करुणरसपरिपूरितं पद्यद्वयमस्य महाकवेः मार्मिकमपि मल्लिनाथार्यमुपहसता विमर्शकवर्येण रसात् भ्रंशितमित्य-लमप्रस्तुतप्रसङ्गेन।

यथास्य महाकवेर्वैदर्भी रीतिस्तथा भट्टनारायण भवभूति प्रभृतिषु ओजोऽपि परिनिष्ठितम्। तत्रापि भट्टनारायणे प्रसादातिशयसहकृतं वैदर्भीपरिपोषितं च कामपि कमनीयतामावहति—इति।

अलङ्कारादिकं तु यद्यपि नार्थकक्षामतिक्रामति, तथापि चमत्कारवि-शेषाधानात् पृथक् परिगणितम्। उत्प्रेक्षादयो हि शब्दादीनधरीकृत्य उ-न्नतशिरस्कतया प्रकाशन्ते। यत्र पुनर्न तथा, किन्तु रसादिपरिपोषमेवा-वहन्ति तत्र न प्राधान्यमप्यर्हन्ति।

अथ कस्याचार्यस्य प्रज्ञाऽस्य शास्त्रस्यादिमा जननीति विचारे केचित् सर्वेष्वप्यलङ्कारग्रन्थेषु प्रायःकालिदासीयपद्योद्धरणात् ततोऽर्वाचीनकाल एवाऽस्य बहुलं प्रचारोऽजनीत्याहुः। अन्ये तु भामहो दण्डी वा अस्य प्रथमा-चार्य इति मन्यन्ते। वस्तुतस्तु बहुत्र श्रुतिष्वप्यलङ्काराणां स्फुटमुपलम्भात्, 'अभ्रातेव पुंस इत्यस्यामृचि चतस्र उपमाः' इति यास्कवचनात्, पण्डिते-न्द्रेण रसगङ्गाधरेऽतिशयोक्तिसारालङ्कारयोरुदाहरणे 'द्वा सुपर्णा सयुजा सखायः' इत्यस्याः 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः' इत्यस्याश्च श्रुतेः उपन्यसनात्, अलङ्कारकौस्तुभे च बह्वीनां श्रुतीनामुदाहरणेषु दर्शनात् "रसो वै सः" "रसꣳ ह्येवाऽयं लब्ध्वाऽऽनन्दी भवती'त्यादि पूर्वोदाहृतश्रुत्या च न परमार्थतः कोप्यस्यादिमः कर्ता वा आविष्कर्ता वा भगवन्तं स्वय-म्भुवमन्तरेणेति युक्तमुत्पश्यामः।

नाट्यशास्त्रस्याविर्भावविषये तु एवमुक्तं भरतनाट्ये-

"पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे।
त्रेतायुगे प्रवृत्ते च मनोर्वैवस्वतस्य च।
ग्राम्यधर्मे प्रवृत्ते तु कामलोभवशं गते।
ईर्ष्याक्रोधादिसंमूढे लोके सुखितदुःखिते।

देवदानवगन्धर्वै रक्षोयक्षमहोरगैः ।
जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते ।
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।
क्रीडनीयकमिच्छामो दृश्यं श्रव्यञ्च यद् भवेत् ।
नच वेदविहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात्सृजाऽपरं वेदं पञ्चमं सार्ववर्णिकम् ।
एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
सस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् ।
धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससंग्रहम् ।
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ।
सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ।
संकल्प्य भगवानेवं सर्ववेदाननुस्मरन् ।
जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि । इत्यादि ।

एतेनापि स्वयम्भूप्रभवत्वमस्याऽवसीयते ।

अथाऽस्य शास्त्रस्य 'अलङ्कारशास्त्र'मितिसंज्ञा कुतःसंजाता — इति विचारे तु एवं प्रतीमः — यद्रामायणादीनां रसमयत्वदर्शनेन भरतनाट्यावलोकनेन च प्राचीनसमये रसमयस्य रमणीयार्थस्य दोषवर्जितस्य गुणवतः शब्दस्य काव्यत्वं स्वीचक्रे इति । अग्निपुराणीयं काव्यलक्षणमप्येतदेव पोषयति 'संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली । काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्" इति हि तत् ।

'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्' इति शौद्धोदनेः सूत्रमप्येतदेवाऽवष्टभ्नाति । साहित्यदर्पणे विश्वनाथकृतं काव्यलक्षणन्तु एतस्यैव रूपान्तरमिति स्पष्टमेव ।

ततःपरं भामहादारभ्य रुद्रटं यावत् प्रायः पञ्चमशतकपर्यन्तमलङ्काराणामेव प्राधान्यं प्रतीयते। तत्रापि रुद्रटसमये तु सर्वात्मना शब्दस्यैव काव्यत्वं, शब्दालङ्काराणामेव च काव्यालङ्कारत्वम्, रूपकादीनामर्थालङ्काराणाञ्च

वाच्यत्वं, शब्दबन्धादिष्वेव च कवीनां स्थापितसर्वस्वकत्वं प्रतीयते। यदुक्तं भामहेन—

'रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः
न कान्तमपि निर्भूषं विभाति वनितामनम्।
रूपकादिमलङ्कारं बाह्यमाचक्षते परे।
सुपां तिङाञ्च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्'

अत्र पूर्वकारिकया अलङ्काराणामुत्कर्षमात्राधायकत्वम्, अर्थालङ्काराणां काव्योपस्कारकत्वम्, अर्थस्यापि च काव्यत्वमिति भामहात्प्राचीनाचार्याणां समय आसीदिति स्फुटमेव प्रतीयते।

द्वितीयया तु—भामहसमये " परे सुप्तिङ्व्युत्पत्तिरेव वागलङ्कृतिः, रूपकादयोऽर्थालङ्कारा बाह्याः" इत्यनेनैव कथनेन शब्दमात्रस्य काव्यत्वम्, अर्थस्यापि च बाह्यत्वमिति ज्ञायते। किञ्च अलङ्कारसर्वस्वे राजानकरुय्यकसन्दर्भेण, एतत्कालिकानामाचार्याणां मते अलङ्काराणामेव प्राधान्यमिति स्पष्टं भवति।

तथाहि—इह हि तावद् भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतया अलंकारपक्षनिक्षिप्तं मन्यन्ते। तथाहि— पर्यायोक्ताऽप्रस्तुतप्रशंसा, समासोक्त्याक्षेप, व्याजस्तुत्युपमेयोपमाऽनन्वयादौ वस्तुमात्रं गम्यमानं वाच्योपस्कारकत्वेन 'स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्' इति द्विविधया भङ्ग्या प्रतिपादितं तैः। रुद्रटेन तु भावालङ्कारो द्विधैवोक्तः। रूपक, दीपकापन्हुतितुल्ययोगितादावुपमाद्यलंकारो वाच्योपस्कारकत्वेनोक्तः। उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता। रसवत्प्रेयःप्रभृतौ तु रसभावादिर्वाच्यशोभाहेतुत्वेनोक्तः। तदित्थं त्रिविधमपि प्रतीयानमलंकारतया ख्यापितमेव। वामनेन तु सादृश्यनिबन्धनाया लक्षणाया वक्रोक्त्यलंकारत्वं ब्रुवता कश्चिद् ध्वनिभेदोऽलंकारतयैवोक्तः। केवलं गुणविशिष्टपदरचनात्मिका रीतिः काव्यात्मत्वेनोक्ता। उद्भटादिभिस्तु गुणालंकाराणां प्रायः साम्यमेव सूचितम्, विषयमात्रेण भेदप्रतिपादनात्। तदेवमलंकारा एव काव्ये प्रधानमिति प्राच्यानां मतम्। अस्मादेव समयादस्य शास्त्रस्या'लंकारशास्त्र'मिति संज्ञा प्रावर्ततेति सुशकम् अनुमातुम्।

यतोऽत्र अलङ्काराणामेव प्राधान्यम्—प्रधानेन च व्यपदेशा भवन्तीति स्थितिः। अयञ्च रुय्यकाचार्य एकादशस्य शतकस्य अन्तिमार्धे आसीदिति प्रमाणैरनुमीयते। अस्य च समये ध्वनेः प्राधान्यमङ्गीव सर्वात्मना प्रसृतमित्यस्यैव ग्रन्थादवसीयते। अयं हि ध्वनिकारमतं निरूपयन्नाह "तस्माद् विषय एव व्यञ्जनामा जीवितत्वेन वक्तव्यः, यस्य गुणालङ्कारकृतचारुत्वपरिग्रहसाम्राज्यम्। रसादयस्तु जीवितभूता नाऽलंकारत्वेन वाच्याः, अलंकाराणामुपस्कारकत्वाद् रत्यादीनां च प्राधान्येन उपस्कार्यत्वात्। तस्माद् व्यङ्ग्यो वाक्यार्थीभूतः काव्यजीवितमित्येष एव पक्षो वाक्यार्थविदां सहृदयानामावर्जकः" इति।

एतेन ध्वनिकारमतमेव रुय्यकस्य मतमितिस्पष्टमेव, ध्वनिकारस्तु कदा संजातः, किं वाऽस्य नामेत्यत्र विषये पद्यमिदमुपलभ्यते—

"ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना।
आनन्दवर्धनः कस्य नासीदानन्दवर्धनः।"

अनेन च आनन्दवर्धनाचार्येण 'ध्वनि'—ग्रन्थे 'आलोक'-नाम्नी टीका रचिता। तद् यद्ययमेव स्वोपज्ञध्वनिकारिकाव्याख्याता ध्वनिकारस्तदा ध्वनिग्रन्थनिर्माणं सप्तमे शतके जातमिति शक्यं निर्णेतुम्। अन्यथा तु ततोऽपि प्राचीनमिति निश्चितमेव। ध्वनिकारेणापि प्राचीनाचार्यसिद्धान्त एव स्वमते संगृहीत इति ध्वनिग्रन्थस्यैवान्तिमकारिकाभिः स्पष्टं भवति। यद्यप्येतस्मात्समयाद् ध्वनिप्राधान्यं प्रावर्तत, तथापि शास्त्रस्य 'अलङ्कारशास्त्र' मित्येव नाम गतानुगतिकतया तथैव प्रवृत्तम्। एतावांस्तु विशेषो जातः, यद् यथा प्राचीनाचार्या निजनिर्मितानां ग्रन्थानां 'काव्यालङ्कारः' 'अलङ्कारसूत्रम्', 'अलङ्कारसारसंग्रहः', 'वामनालङ्कारः', 'वाग्भटालङ्कारः', 'अलङ्कारशेखरः' इत्यादीनि अलङ्कारशब्दप्रधानानि नामानि प्रायः प्राणैषुस्तत्रानुगतार्थतायामरुचिमिव पश्यद्भिरर्वाचीनाचार्यैः 'काव्यप्रकाश',- 'काव्यप्रदीप' 'काव्यानुशासन'—'साहित्यकौमुदी'—'साहित्यदर्पणा' दीनि नामानि प्रायोजितानि स्वेषु निबन्धेषु। 'साहित्य'-शब्दस्तु अत्र शास्त्रे अलङ्कारध्वनिगुणदोषादीनां पृथक् निबन्धेष्ववस्थितानां सहितीकरणसमयात् प्रावर्ततेति मन्महे।

प्राचीनेषु निबन्धेषु दृश्यश्रव्यकाव्यविषयकाः प्रायो भिन्ना एव सन्दर्भाः । पण्डितेन्द्रस्तु अत्रापि शब्देऽस्वरसमिवोद्भावयन् सत्स्वपि वर्णनीयविषयान्तरेषु रसस्यैव प्राधान्यात् तेनैव व्यपदेशस्यौचित्यमिति सूचयन्निव 'रसगङ्गाधरे'–तिनामनिर्देशमकार्षीदिति । अलङ्कारकौस्तुभादयः पुनरर्वाञ्चोऽपि तन्मात्रनिरूपका इत्यलं शुष्कविचारेण ॥

अथ प्रायः सर्वेष्वप्येतेषु प्रधाननिबन्धेषु काव्यलक्षणमवश्यमुक्तं विचारितञ्च । तत्र शब्दः काव्यम्, शब्दार्थौ वा काव्यमित्येव पक्षद्वयं प्रायोऽनेकरूपतामापन्नम् ।

'इष्टार्थव्यवच्छिन्ना पदावली काव्यं स्फुरदलङ्कारं गुणवद् दोषवर्जित'मिति अग्निपुराणोक्तं काव्यलक्षणम् । 'इष्टार्थोपेता पदावली काव्य'मिति दण्डिमतमपि पूर्वस्मान्नातिभिन्नम् । 'काव्यं रसादिमद् वाक्यं श्रुतं सुखविशेषकृत्' इतिशौद्धोदनेर्मतम्–'रसाऽलङ्कारयुक्तं सुखविशेषसाधनं वा वाक्यं काव्य'मिति केशवमिश्रमतमपि पूर्वस्यैव रूपान्तरम् । 'रसात्मकं वाक्यं काव्यम्' इति विश्वनाथमतमप्येतेनैव उक्तप्रायम् । 'गुणाऽलङ्कारयुक्तौ शब्दार्थौ काव्य'मिति वामनमतम् । 'गुणालङ्काररीतिरसोपेतः साधुशब्दार्थसन्दर्भः काव्य'मिति वाभटमतम् । 'निर्दोषं गुणालङ्कारलक्षणरीतिवृत्तिमद् वाक्यं काव्यम्' इति पीयूषवर्षापरनाम्नः पक्षधरमिश्रस्य मतम् । 'निर्दोषं गुणालङ्काररसवत् वाक्यं काव्य'मितिभोजमतम् । 'अदोषौ सगुणौ स्फुटाऽस्फुटाऽलङ्कारौ शब्दार्थौ काव्य'मिति श्रीमन्मम्मटाचार्यस्य मतम् । एतादृशमेव प्रभाकरस्य मतम् । काव्यप्रदीप,-काव्यानुशासन,-साहित्यकौमुदीप्रभृतिषु निबन्धेषु तु गोविन्दठक्कुर,-सिद्धहेमचन्द्र,-विद्याभूषणप्रभृतिभिर्मम्मटोक्ता एव कारिका व्याख्याता इति तन्मतं न ततोऽतिरिच्यते । साहित्यकौमुद्यां विद्याभूषणस्तु प्रकाशकारिका भरतनिर्मिता इति बभाण ।

काव्यप्रकाशे हि दशमोल्लासे रूपकप्रकरणे 'माला तु पूर्ववत्' इति कारिकांशेन मालोपमासाम्येन मालारूपकमुक्तम्, न च मालोपमा पूर्वं कारिकायामुक्ता, किन्तु व्याख्यायामेव । यदि कारिकाभागो भरतकृतः स्यात्, कथमिवासौ मम्मटग्रन्थोक्तां परकालवर्तिनीं मालोपमां बहुतरसमयपूर्वासु निजकारिकासु दृष्टान्तीकुर्यात् । मम्मटेन तु बहवो भरतकारिका रूपान्त-

रेव बहवश्च तेनापि रूपेण संगृहीताः स्वग्रन्थे, इत्यन्यदेतत्, इत्यलमप्रकृतेन। काव्यस्य लक्षणे मतान्तराण्यप्येवंविधान्येव ।

साहित्यदर्पणकारं विश्वनाथं विहाय न केनाप्येवमतिक्रूरं कटाक्षिता-न्यन्यमतानि। यद्यपि सर्वेषां विवेचनस्य नास्त्यत्रावसरस्तथापि विश्वनाथ-विषये किञ्चिदवश्यं वक्तव्यम् । अयमुत्कलब्राह्मणश्चन्द्रशेखरतनुजन्मा वैक्रमे सप्तदशे शतके आरम्भभागे संजातः, एतत्कृतो ग्रन्थः (साहित्यदर्पणः) काव्यप्रकाश, ध्वन्यालोक, दशरूपकादीन् उपजीव्य वर्तमान इति विदित-मेव विवेचकानाम् ।

प्रथम एव परिच्छेदे ऽनेन स्वोपज्ञस्य पाण्डित्यस्य परा काष्ठा प्रादर्शि। अ-स्मिन्नेव च प्राचीनाचार्या अनुचितमाघूर्णिताः। सर्वाधिकं च मम्मटाचार्यो ऽस्य रोषविषयः। एतन्मतेन मम्मटोक्ते "तददोषौ शब्दार्थौ" इत्यादिलक्षणे पदापेक्षयापि अक्षरापेक्षयापि च अधिकसंख्या दोषाः सन्ति। न केवलं लक्षण-मेवाऽस्य सर्वांशदुष्टम्—अपि तु अनुपदमेव दत्तं तदुदाहरणमपि प्रमादविजृ-म्भितमेव। किञ्चाऽयं मम्मटः स्वयमुक्तमपि वस्तु क्षणेनैव विस्मृत्य पदान्तरं गत्वा अन्यादृशं तद् वर्णयति। अलङ्कारज्ञानमप्यस्य नास्ति। ध्वनिकारोऽप्ये-तत्समकक्ष एव, यः स्ववचनविरोधमपि न चेतयते । अन्येपि बहव एवंविधा एव। यदि खल्वयमष्टादशभाषावारविलासिनीभुजङ्गः पञ्चाननो न जगति अवतारग्रहणेन लोकमन्वग्रहीष्यत, तदा को नाम चिरप्ररूढमेतं महान्तं प्रामादिकसम्प्रदायमध्वंसिष्यत । कोवा न केनाप्यन्येन आघ्रातमपि रसस्य-प्राधान्यं काव्येष्वस्थापयिष्यत ।

अत्र विचार्यते—यःखलु मम्मटाचार्यो ग्रन्थारम्भ एव "सकलप्रयोजन-मौलिभूतं रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्द" मितिग्रन्थेन रसस्य सर्वातिशायित्वं कथयति, अष्टमे चोल्लासे "ये रसस्याङ्गिनो धर्माः" इति स्वकारिकायामेव तद्वर्णने च रसस्याङ्गित्वं प्रतिज्ञापयति, सप्तमे च "रसश्च मुख्यः" इति कारिकयैव मुक्तकण्ठमुद्घोषयति, अन्यत्रापि च बहुत्र रस-स्यैव प्राधान्यमिति व्यञ्जयति, स एव वागदेवतावतारः श्रीप्रकाशकारः काव्यलक्षणाऽवसरे सर्वमिदमेकपदे व्यस्मार्षीदिति कः खलु अप्रमत्तः प्र-तीयात् । यश्च ध्वनिकारः सकलालंकारिकाणां मूर्धाभिषिक्तः, यदुपजीव्य-

तथैव अद्यत्वे उपलभ्यमानेषु साहित्यसन्दर्भेषु ध्वनिर्वर्ण्यते–विश्वनाथस्यापि च य उपजीव्यः, स एवाऽयं स्ववचनविरोधमपि न पश्यतीति कीदृशं वचः । तदेवमुपजीव्येषु विषमं दंशनिवेशं कुर्वता दर्शिता भुजङ्गता पञ्चाननेन ।

किञ्च–'विशिष्टौ शब्दार्थौ काव्य" मितिलक्षणं सर्वात्मना उपद्रवता भवतापि यद् 'रसात्मकं वाक्यं काव्यम्' इति लक्षणमाख्यातम्, तत्रोच्यते–वाक्यमित्यनेन सामानाधिकरण्योपपत्तये 'रसात्मकम्' इत्य बहुव्रीहिः समासोऽवश्यमाश्रयितव्यः स्यात्, बहुव्रीहिश्चान्यपदार्थप्रधानो भवति, अन्यपदार्थश्चात्र वाक्यमेव, वाक्यं च शब्दविशेष एव–एवं च बहुव्रीहिसमाश्रयणेनाऽपि भवता शब्दे रसमुपसर्जनीकुर्वता न पारितमेव सर्वात्मना रसस्य प्राधान्यं दर्शयितुम् । एतेन च "शब्द एव काव्यं नार्थः," इत्येवोक्तं भवति । तदपि न विचारचारु, आस्वादव्यञ्जकत्वस्य काव्यत्वप्रयोजकस्योभयत्र शब्दार्थयोरविशेषेण वृत्तेः । अतएवाहुर्नागोजिभट्टाः "चमत्कारिबोधजनकज्ञानविषयतावच्छेदकधर्मवत्त्वरूपस्य अनुपह्नवनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च । काव्यं पठितं, श्रुतं काव्यं, बुद्धं काव्यमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति, अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकः 'तदधीते तद्वेद, इति सूत्रस्थो भगवान् पतञ्जलिः संगच्छते । तेनानुपह्नवनीयकाव्यलक्षणं प्रकाशोक्तं निर्बाधमिति"। किञ्च चमत्कारनिमित्ता ध्वनय एव काव्ये उत्तमत्वप्रयोजकास्ते च शब्दार्पितयाऽपि अर्थे बहुसंख्याकाः, अतोऽप्यर्थस्य चमत्कारकत्वं निरपह्नवनीयमेव । किञ्च शब्दमात्रस्य काव्यत्वं वदतामभिनयादिषु रूपकेषु का गतिरिति ते एव जानन्ति । किञ्च 'शब्दार्थौ काव्यस्य शरीरमिति' विश्वनाथेनापि उपष्टम्भकवाक्ये उक्तमेव-तत्रोभयोः शरीरत्वे समाने किमिव शब्दस्यैव रस आत्मा, नार्थस्येत्यत्र किमुत्तरं विश्वनाथस्य । न खलु "स्थूलमेव शरीरं आत्मवद् भवति न पुनः सूक्ष्ममपीति शक्यं युक्तिशतैरपि उपपादयितुम् । स्वप्ने यथा संनिहितेऽपि स्थूलशरीरे केवलेन सूक्ष्मशरीरेणैव आहारविहारादिकं सम्पद्यते, एवं रूपकेषु अतितटस्थतया भासमानेषु स्थूलशरीरस्थानीयेषु शब्देषु अर्थेनैव प्रधानतया चमत्कृतिः साध्यते इति सकलसहृदयहृदयसंवादसिद्धम् ।

एवं च रसात्मकौ शब्दार्थौ काव्यमित्येव वक्तव्यं भवतापि । किञ्च भवता काव्यत्वेन अभिमते वाक्ये रसः कथमवतिष्ठेत, भवन्मतानुसारेणापि आत्मस्वरूपविशेषस्य तस्य आकाशगुणे शब्दे संस्पर्शस्यापि दुर्लभत्वात् ।

यदि तु रसप्रकाशकभावनाविषयार्थप्रतिपादकत्वेन सम्बन्धेन, रसप्रकाशकतावच्छेदकार्थप्रतिपादकतासंसर्गेण वा रसवत्त्वं शब्दे उपपाद्यते इति ब्रूषे, तर्हि प्रकाशोक्तं 'सगुणौ', इति विशेषणमुपद्रवता भवता किमर्थमुद्धुनिता धूलिरिति पृच्छामः । यदि तु सरसस्यैव काव्यत्वं स्वीकारयितुं तथा प्रयास इति चेत्, तदपि न युक्तम् । नीरसेऽपि चमत्कारिणि वस्त्वलङ्कारव्यञ्जके शब्दार्थयुगले काव्यत्वस्य ध्वनिकारादिसकलालङ्कारिकसम्मतत्वात् । इदन्त्वत्रावधेयम्—यथा स्थूलसूक्ष्मशरीरयोरेकविनाकृतस्यापरस्य न कार्यकरत्वं दृश्यते, एवं काव्यमार्गेऽपि अर्थस्य व्यञ्जकत्वे शब्दस्य, शब्दस्य च व्यञ्जकत्वे अर्थस्य, सहकारिता अवश्यमाश्रयणीयेत्यतिविस्तृतिभयाद् विरम्यते ।

नाद्यापि तत्त्वतो विद्मो यत्प्रकाशस्य केन दुरदृष्टेन दर्पणोऽजनिष्ट, येन सर्वात्मना प्रकाशं प्रतिक्षिपता व्याकुलीकृतानि लोकलोचनानि ।

तदेवमस्मिन्निबन्धे—शब्दब्रह्मणः स्वरूपम्, सामर्थ्यमुपयोगश्च प्रदर्शितः। ततस्तु शब्दस्य त्रैविध्यम्, रसविषये मतभेदाः, तेनास्यानिर्वचनीयत्वम्, आनन्दांशसंवादेन श्रुत्युपष्टम्भेन चात्मस्वरूपत्वम्, अनौचित्यस्य रसभञ्जकत्वम्, श्रीमम्मटाचार्यलक्षणघटकस्य 'अदोषौ,' इति पदस्य कृतिः, सरसकाव्यनिर्माणोपायश्च, काव्यस्य पञ्चविधत्वम्, शुद्धवैदिकसाहित्यम्, उभयोपकारकं साहित्यम्, शुद्धलौकिकसाहित्यस्य शुद्धवैदिकसाहित्येन तुलना, लौकिकसाहित्यवाक्यानां मीमांसाकरम् औचित्यविचारकम् अलङ्कारशास्त्रम्, पञ्चविधलौकिकवाक्यानां वर्णनम्, लौकिकसाहित्यस्य प्रभावेन अन्तःकरणे जायमाना द्रुतिदीप्त्यादयोऽवस्थाः, द्रुतौ श्रीकालिदाससिद्धिः, अलङ्कारशास्त्रस्य संज्ञा तदारम्भकालश्च, साहित्यशब्दप्रयोगः, काव्यलक्षणेषु विमतिः, प्रकाशदर्पणकर्तुः आक्षेपाश्चेति विषयाः संक्षेपविस्तराभ्यां विचारिताः ।

तदस्मिन् पूर्वोक्ते यथाशक्ति यथामति च अर्वाचीनसंस्कृतसाहित्यस्य समुज्ज्वलः पक्षः समुपन्यस्तः ।

तमिस्रपक्षोपि च अवश्यं निरीक्षणीयः—यतो न तेन विना विवेचना पूर्णा सम्भवतीति सोपि संक्षेपेण वक्ष्यते ।

१ स्थिरम्, २अस्थिरञ्चेति द्विविधं साहित्यम् । अद्यापि गीर्वाणगिरां स्थिरसाहित्यस्य पादपीठं यत्रावतिष्ठते, तत्र सभ्यमानिनीनामितरभाषाणां मूर्धानोपि न लब्धास्पदा इति परमं प्रमोदस्थानं खलु भारतीयानाम् । अस्थिरस्य साहित्यस्य तु नितरामभाव इति महतः खेदस्य, मर्मान्तिकवेदनायाश्च निमित्तम् ।

लौकिकसाहित्यस्य साहाय्येन बोध्यमानः शुष्कतरोपि विषयो रसास्वादसन्दोहजनकतया, चमत्कारजनकतया वा अचिरेणैव हृदयान्यधिकरोति, उपदिष्टार्थानुष्ठापनाय च अमोघमस्त्रं भवतीति निर्विवादम् । जानन्त्येव इतिहासज्ञा यत् सम्पूर्णां रात्रिं नियुध्य संश्रान्ता अपि निद्रादरिद्रीकृता, त्वाहा अपि शस्त्रैर्विक्षतदेहा अपि च शतद्वयमिताः श्रीशिवराजस्य योधाः वीररससिद्धसरस्वतीकस्य भूषणकवेः सरस्वत्या समुत्साहिताः समासादित विद्युद्बला इव बुभुक्षिता व्याघ्रा इव च दुर्गान्निर्गत्य क्षणेन मध्येरणक्षेत्रं समापतन्तीं महतीमपि यवनसेनां तूलपूलिकामिव समुत्तोलयामासुः । अन्यान्यपि बहून्युदाहरणानि यत्र सत्कविवचनरचनाचातुरीवशीकृतप्राणैरल्पप्राणैरपि महाप्राणसाध्यानि भूयिष्ठानि महाकार्याणि अञ्जसाऽनुष्ठितानि ।

अत्र च साहित्ये समुपदिश्यमानोर्थस्त्रिधा विभक्तः—१ केवलादृष्टार्थः, २ दृष्टादृष्टार्थः, ३ केवलदृष्टार्थश्चेति । पारलौकिकः परमार्थसाधनं शब्दप्रमाणमात्रवेद्यश्चार्थः केवलादृष्टार्थः । परमार्थप्रधानतया, तत्समकक्षतया, तत्सहकृततया वा दृष्टमप्यर्थं साधयमानोर्थो दृष्टादृष्टार्थः, एतद्द्विविधार्थप्रधानमेव साहित्यं स्थिरसाहित्यमितिशक्यं वक्तुम् । चिरपर्यन्तं तत्र परिवर्तनस्यानुपलम्भात् । एतादृशस्य लौकिकवैदिकसाहित्यस्य संस्कृते न न्यूनता-अनन्तं हि सुरभारतीकोषे तादृशं साहित्यम् । एकमपि श्रुतिवाक्यं तैस्तैराचार्यैः परमार्थप्रदर्शकतया वर्ण्यमानं नितरां मोहयति—आश्चर्ययति—स्तम्भयति च निखिलानपि जगन्निवासिनः सभ्यमानिनः ।

यस्य पुनः साहित्यस्य सम्बन्धो वर्तमानेन जगता, साम्प्रतिक्या देशदशया, साम्प्रतिकै राज्यैः, साम्प्रतिकैर्देशैः, साम्प्रतिकैर्देशवासिभिः, साम्प्रतिकैर्भावैः, साम्प्रतिकेन व्यापारेण, साम्प्रतिकेन समाजसंघटनेन, साम्प्रतिकेन भूगोलेन, वास्तविकेन च इतिहासेन, तद् अस्थिरं साहित्यन्तु संस्कृते न नामापि विलोक्यते ।

यदि स्थिरं साहित्यं भाषायाः कलेवरमित्युच्यते, तदा अस्थिरं साहित्यं वसनाशनस्थानीयमित्युक्तं नातिशयितं भवति । यथा अतिकमनीयकलेवरस्यापि दृढसन्नाहपरिणाहस्यापि महाबलवतोऽपि च पुरुषस्य वसनाशनाभ्यां विहीनस्य जीवनं न सम्भवति, एवं भाषाया अपि अस्थिरसाहित्याभावे दुर्दैवमवश्यम्भावि ।

नेदमविदितं यद् भाषायाः साहित्यस्य वा जीवनमेव जातेर्जातिमतां च जीवनाय जीवातुभूतम् । यद्यस्माकं स्थिरं साहित्यं तावदुन्नतम् अमृतपरिपूर्णञ्च नाभविष्यत् तदा एतावन्तं कालमस्थिरस्य साहित्यस्य विरहे अद्य यावत् अस्माकं सभ्यतायाः जातेश्च जगति नामापि नावशेक्ष्यत् । जगति नष्टा अन्यजातीया इव वयमपि अतिगभीरे कराले कालोदरे अपुनर्जागराय शयिता अभविष्याम । अद्यापि संस्कृतप्रणयिभिर्यदि परिशीलिता सैव चिरपरिचिता कुम्भकर्णनिद्रासखी दीर्घसूत्रता—न च चेष्टितं प्रतीकाराय तदा सुरभारत्याः परमपदप्रस्थानदिनस्याऽऽसन्नता दुर्निवारैव ।

अद्य यदा भूतधात्र्या धरित्र्या वक्षःस्थले प्रतिकोणं रथलपटलीबलेन वायुं परिभिन्दानानीव वाष्पयानानि महावेगेन सर्पतां पन्नगानामिव दृश्यं दर्शयन्ति—यदा च वारांनिधेः सरित्पतेर्भीषणानां चपलताञ्च मुष्टिना परिमित्य निर्भीका निःशङ्काश्च रणपोताः वारिनिधेर्वक्षो विदारं विदारं विद्रवन्ति—यदा च काष्ठतरणमिव लौहतरणमपि असम्भवात् सम्भवतामानीतम्—यदा च—

लक्षचतुष्टयखारीपरिमितलोहेन निर्मितः पोतः ।
तरति सुखेन विशङ्कं बहुतरवेगो रणस्पर्धी ॥—यदा च—

वारिमज्जे अज्ञातसञ्चारोऽनुपलक्षितजयस्तारपीडैः क्षणेन रणपोतं क्षपयित्वा विपक्षस्य तारां पीडां जनयति— यदा च कल्पान्तकृतान्तमुखकन्दराणामिव

कालानलमुद्वमन्तीनां भुवनभयङ्कराणाम् शतघ्नीनां नवनवा आविष्काराः संसारमधिकर्तुं जायन्ते, तस्मिन्नेव पुरुषार्थमये चेष्टामये प्रकाशमये च समये संस्कृतज्ञाः केवलं 'द्वादशभिर्वर्षैर्व्याकरणं श्रूयते' इत्येव निमीलितलोचनं गायन्तः सन्तुष्यन्तीति किं न खेदस्य वा अपाया वा भयस्य वा आस्पदम् ।

यदा मङ्गलग्रहं ग्रहीतुं वा तत्र विहर्तुं वा आयोजनानि सम्पाद्यन्ते, वायुमण्डलविमार्गीणि व्योमयानानि प्रस्तूयन्ते— यदा च संसारस्य कस्मिंश्चिदपि कोणे न कश्चिदपि जलीयः स्थलीयो वाऽङ्गुलिपरिमितोऽपि तादृशो भागो यो न ज्ञातो वा नावगाहितो वा स्यात्—तदा संस्कृतज्ञानां 'भुजङ्गपिहितद्वारं पातालमधितिष्ठती' त्येतावन्मात्रभूगोलज्ञाने निलीनत्वं किं न शोचनीयम् ? ।

तुच्छातितुच्छं महतो महीयश्च सर्वमेव कार्यं—यथा स्वागतीकरणम् , आतिथ्यसत्कारः, पाकनिर्माणम् , गृहपरिमार्जनम् , व्यजनवाहिता, वस्त्रशोधनम् , भोजनप्रस्तुतिः, चौरनिग्रहः, रक्षापुरुषाणामाकारणम् , भूमिर्निलीनखनीनां निवेदनम् , अनेकविध–यानपरिचालनम् , भूमिखननम् , शत्रुनिबर्हणम् , समाचारप्रापणम् , शब्दवहनम् , निरालम्बनो दूरग्राह (Wireless telegraph) इत्यादीनि अदृष्टश्रुतानि अचिन्तनीयानि सर्वाण्येव कार्याणि यदा गर्भदासीव एका केवलं विद्युन् सम्पादयति पाश्चात्येषु, तदा संस्कृतज्ञानाम् अवच्छेदकावच्छिन्नमात्रस्य जाले निपतनं किं न दयनीयम् , किं वा न चिन्तनीयम् ? असति प्रतीकारावलम्बने कियन्तं किल कालं जीवनमेषां सम्भवतीति किं न विचारणीयम् ?

साम्प्रतं भारते कियत्यो जातयः ? किंवा तासां जीवनालम्बनम् ? कथं वा ता उपार्जयन्ति? के वा तासु अत्याचाराः? कीदृशी अस्माकं देशस्य दशा? कुतो वा अस्मन्मनसामीदृशी अधोगतिः संजाता ? के वा अस्मद्देशे प्रधानव्यापारिणः ? कीदृशा वा तैरस्माकं लाभा हानयो वा ? कुतो वा भारतस्य आधिराज्यं विनष्टम् ? कानि वा तत्कारणान्यद्यापि विद्यन्ते ? कीदृशो वा अस्माकं शिक्षाप्रचारः ? किं वा अद्यत्वे अवश्यं शिक्षणीयम् ? रथ्यापटलीकुल्ययोः कियानस्मद्देशे विस्तारः ? कस्को लाभ स्ताभ्याम् ? कीदृश्यो वा हानयः ? के वा प्रजानामधिकाराः ? केवा साम्प्रतिका राजधर्माः ?

सत्यां वा विपत्तौ कथं प्रतिकर्तव्यम् ? दुर्भिक्षनिवारणाय प्रारब्ध-मपि रचनपटुत्वा कुतो वा पूर्वापेक्षयांपिदशगुणितं दुर्भिक्षमुत्पाद्यते ? यावता अनेहसा समस्तसंसारस्य समस्तेष्वेषुपञ्चाशल्लक्षपरिमिता मानवा अम्रियन्त—तावतैव केवलं भारते एव समरापेक्षया बहुगुणेभ्योऽप्यधिकाः पञ्चविंशतिलक्षोत्तरकोटित्रयपरिमिता दीनाः क्षुधातुराः दुर्भिक्षराक्षसेन भक्षिता इत्यादिकेषु विषयेषु किं न कोपि तादृशोयो भारतगुरूणां आत्मजानां विशेषतः संस्कृतज्ञानां ज्ञातव्यः स्यात् । अन्येषांविषयाणां तु कथैव का—बहवः संस्कृतज्ञास्तु इदमपि न जानन्ति, यद् भारतवर्षं कुतः प्रारभ्य कुत्र समाप्नोति । संस्कृतोन्नतौ बद्धपरिकरेण अस्माकमन्य-तमेन प्रियसुहृदा कनखलस्थः कश्चिच्छात्रः "कनखलनगरस्य दक्षिणभारते वा उत्तरभारते वास्थिति"रिति पृष्टो 'कनखलं दक्षिणभारते' इत्युत्तरितवान् उपपत्तिं चेमां प्रदर्शितवान् यद् हिमालयाद्दक्षिणे विद्यमानं नगरं दक्षिण-भारत एव सम्भवतीति । किंबहुना—'बाह्यज्ञानशून्यत्वं पण्डितत्व' मिति लक्षणमेव साम्प्रतं संस्कृतज्ञानां सम्पन्नम् ।

यदि पुनरिदमुच्येत—यत्संस्कृते न तादृशं साम्प्रतं किमपि पुस्तकं यत्साम्प्रतिकेतिहासभूगोलादीना मावश्यकविषयान् अवगमयेदिति,

तत्र वक्तव्यम्—सम्प्रतीव संस्कृतज्ञेषु वर्तमानायां निश्चेष्टतायां, विजृम्भमाणायां दीर्घसूत्रतायां, संसरन्त्याञ्च जगन्मातृभाषाविषयिण्यामुपेक्षायां किं तादृशानि पुस्तकान्याकाशान्निपतिष्यन्ति ? ।

केषां किल ललाटतटमलङ्करोति सेयङ्कलङ्कलेखा इति पृष्टानां वा किमुत्तरं स्यात् संस्कृतसाहित्यनौकर्णधाराणां महामहतां पण्डित-प्रकाण्डानाम् ? अस्मादृशास्तु न गण्या एव।

यद्ययमभावो न परिह्रियेत तादृशपुस्तकानामनुवादमात्रायपि च क्लेशो नाश्रीयेत—वाराणसेयीषु, पञ्चाम्बुप्रदेशीयासु, अन्यासु वा परीक्षासु तादृश पुस्तकानां ज्ञानं नावश्यकं क्रियेत—नूनं दुर्निवारा दुर्निवारा, खल्वियं दुरवस्था ।

बहवस्तु विषयान पुस्तकेषु पठनयोग्या भवन्ति अपितु समाचारपत्रैरेवा-वेदिता पर्याप्ता भवन्ति ज्ञानाय—परं साम्प्रतिकानां संस्कृतसमाचारपत्राणां

कीदृशी दशेति दर्शयितुं तुदन्मनायमानमपि भयात् वेपते हृदयम्—यथा खलु संस्कृतपत्राणां प्रशस्तविस्तृतं क्षेत्रं तथा न भाषान्तराणाम्। केवल संस्कृतज्ञा हि साधारणमालसाधनमपि लोकयन्तम् अद्भुतमिव अश्रुतमिवाश्रुतमिव च कलयन्तः चकितचकिताः निभृतकर्णा उद्ग्रीवाश्च सन्तः शृण्वन्ति। परं समाचारपत्राणि तु (क्षाम्यन्तु मां सम्पादकमहाभागाः) संसारं संसारवृत्तञ्च तुच्छमिव पश्यन्तः पारेगिरं वर्तमानं विषयं वर्णयन्तः स्वयमप्यविश्वसनीयतां भजन्ते। वाचकानां मनोरञ्जनाय तु कस्याश्चित् देवतायाः कस्यचिद्राज्ञो वा येन केनापि निर्मिता स्तुतिर्वा गीतिर्वा पर्याप्ता मन्यते। अवश्यमवबोधनीयान् विषयान् विहाय अनर्थस्थितान् तांस्तान् विषयान् वर्णयन्ति समाचारपत्राणि, येषां परिज्ञानं गुरूणां सन्निधाने पि न सर्वेषां सुघटम्। एकस्मिंस्तु साप्ताहिके संस्कृतसमाचारपत्रेऽस्माभिर्दृष्टम् यत् 'नाष्टमलौ' इत्यस्य स्थाने 'नाचमलौ' इत्येव कुलीन न्यस्तम्? इति। यदीदृशानि पत्राणि न प्रचुरं प्रचारं लभेरन् अकाण्डएव कालदण्डेन खण्डनां वा भजेरं स्तदा किमिवाश्चर्यम्। का वा वचनीयता वाचकानाम्? । ..

संस्कृतसाहित्ये अस्थिरसाहित्यस्याभाव एव संस्कृतस्य व्यावहारिकत्वे विघातकः। यदि प्रतिदिनं संसारस्य नवाऽऽविष्कृतानां वस्तूनां नामानि संस्कृते उपलभ्येरन्, न तदा व्यवहारकैः किमपि काठिन्य मनुभूयेत।

का वा कथा असतां संकेतानाम्—सन्तोऽपि—प्राचीनैर्निर्धारिता अपि बहुत्र व्यवहृता अपि च ते नाद्यत्वे प्राप्तप्रचाराः। एकदाऽस्माभिरेकोऽध्यापकमहाशयः स्वकीयं छात्रमेव मादिशन् दृष्टोयत् "अरे चिमटापदवाच्यमानय चिमटापदवाच्यम्' सन्तोऽपि चञ्चुपुट, सर्पास्य; तमक, पोलिकाप्रभृतयः शब्दा नात्रलब्धावसरा इतिप्रधानसंस्कृतज्ञानामेवाऽयमक्षन्तव्योऽपराधः।

किञ्च अध्यापनसमये विशेषपदसाहाय्येन पदार्थं प्रतार्य प्राणान् परित्याजयताम् अध्यापकानामपि दीर्घसूत्रता, अलसता, निश्चेष्टता, हतोत्साहता च निन्दनीयैव, ये खलु छात्रैः पृष्टाः कथयन्ति 'बकुलः कश्चिद् वृक्षविशेषः' 'कादम्बः कश्चित्पक्षिविशेषः' इत्यादि। एते हि संस्कृतस्य प्रचारे प्रधानतया बाधकाः।

अस्थिरस्य साहित्यस्याभाव एव मूलं संस्कृतशिक्षायाः प्रचाराभावस्य। येऽपि श्रीकालिदासप्रभृतयो रघुवंशादिकान् सन्दर्भान् स्वभाषायामेव खलु तैः

प्राथमिके शिक्षाविभागे अध्यापनोपयोगितां मनसिकृत्य निबद्धाः सन्ति ग्रन्थाः । परन्त्वद्यत्वे बालानां मानसिकीमवस्थामपरिज्ञाय, तेषां धारणाशक्तिं मननशक्तिञ्चाविगणय्य अध्यापकमन्यास्तांस्तान्पद्यसन्दर्भान् अपरिशीलितगद्यसन्दर्भाणामेव शिशूनां घोषणाय उपन्यस्यन्ति, येन अनुचित घोषणेन बालानां मानसिकं दौर्बल्यं, प्रायः स्वतन्त्रविचाराणाम् राहित्यम् ।

अप्रौढप्ररोहतया मनन शक्तेरालुञ्चनञ्च जायते । बालानां हि शिक्षण मतितमां कठिनं कार्यम् । तदर्थं पुस्तकलेखनाय यावद् बहु विचारणीयं प्रायस्तावन्न विचारयन्ति संस्कृतलेखकाः ।

यस्याऽलङ्कारशास्त्रस्य साहाय्येन जनास्तावतीं वचनचातुरीमुपार्जयन्ति यया क्षणेनैव आबालवृद्धम्, आपण्डितपामरञ्च अन्तःकरणान्यधिकृत्य सुशकमुपदिष्टमनुष्ठापयितुम्, तस्मिन्नेव साम्प्रतं सर्वतोभावेन अराजकता विजृम्भते । यथा अदीप्यमाने राजभये अनुन्मिषति च धर्मभये सर्वोऽप्युच्छृङ्खलो लोको मधुपान,कामिनीगानादिभिरेव व्यतियापयति कालं तथैव अलङ्कारशास्त्रोदाहरणेषु विशेषतस्त्रयोदशशतकादर्वाचीनेषु तत्रापि साहित्यदर्पणादौ अन्यथासम्भवदुदाहरणेष्वपि स्थलेषु परकीयानायिकादीनामेव तथाचरित्राणि चित्रितानि यथा साहित्यशास्त्रं विटचेष्टितानामितिहास इव प्रतीयते ।

येषां खलु नवोन्मिषद्यौवनानां किशोरकाणां कामातुर एव कुलप्रतिष्ठाःप्रतंस्खलयितुम् । यौवनमेव दत्तावधानमुच्छृङ्खलतामार्गे, येषां च सदाचारशिक्षणस्य, दृढव्रतत्वस्य, नैष्ठिकत्वस्य चाऽयमेवोपदेशकालो येषां नवनवार्थपरिज्ञानाय उन्मनायमानानां साहित्यसाहाय्येन देशभक्तिं धर्मभक्तिं, गुरुभक्तिम् अन्यद्वा यदेवाभीष्टं तदेव वप्तुं, नवभाजनलग्नसंस्कारवद्वलीकर्तुञ्च सुयोग्यं सम्पन्नं क्षेत्रमिव समुदितशक्तिशालि मानसम्, तेषां पुरः परकीयादिविचारप्रस्तुतिः कीदृशीति स्वयं विभावनीयम् ।

आदर्शो भविरेव वाऽथ हृदयं येषां परार्थग्रहे
ये वा भाविनि भारतीयविभवे सम्प्रतिष्ठापकाः ।
येषां चारुचरित्ररक्षणमतिप्रेष्ठं सदा शिक्षके
'मूर्खं वासवहं' स्तुवन्ति गुरवो हाऽहन्त ! तेषां पुरः ।

इदमेवाशङ्क्य समाहितं रुद्रटेन—

> 'नहि कविना परदारा एष्टव्या नापि चोपदेष्टव्याः ।
> कर्तव्यतयाऽन्येषां न च तदुपायोऽभिधातव्यः ।
> किन्तु तदीयं वृत्तं काव्याङ्गतया स केवलं वक्ति ।
> आराधयितुं विदुषस्तेन न दोषः कवेरत्र ॥' इति ।

अत्रवदामः—नखलु पुंश्चलीचरित्रश्रवणेन सन्तुष्यतां तादृशां विदुषामाराधनमेव परा काष्ठा कविकर्तव्यानाम् । कविवचांसि हि लोके प्रसृतानि यादृशं भावं जनयन्ति-यथा वा प्रवर्तयन्ति जगन्ति—तत्र सर्वत्र कवेरेव उत्तरदायित्वमिति। न खलु शृङ्गारकथाः नितान्तं परिहरणीया इति वदामः—'शृङ्गारःशुचिः उज्ज्वलश्चेति मन्महे । परम् पवित्रशृङ्गारस्य उत्कर्षकत्वमिव अपवित्रस्य तस्यापकर्षकत्वमपि । नखलु सुरापूरितं मन्दाकिनीवारि पवित्रयतीत्येव निवेदयामः ।

किंबहुना साहित्यशास्त्रदुर्दशा तस्यैव परमाचार्यैः साहित्यनौकर्णधारैः काशास्थैः पण्डितप्रकाण्डैरद्यापि क्रियते इति कस्य न चेतो दूनयेत्सचेतसः ।

काश्यां साहित्योत्तमपरीक्षायां निर्धारिता पाठ्यप्रणाली आश्चर्यं खेदं शोकञ्च सहैव जनयति ।

साम्प्रतिकेषु साहित्यग्रन्थेषु साहित्यदर्पणस्यैव शैली प्राञ्जलविदग्धा, भाषा सरला बालोपयोगिनी, विषयप्रतिपादनशैली च हृदयङ्गमाऽऽस्ते । परम् उक्तपरीक्षायामयं सर्वान्तिमः साहित्यग्रन्थःपञ्चमेखण्डे स्थापितः, यत्राऽलङ्कारकौस्तुभोऽतिनवीनेऽष्टादशे शतके रसगङ्गाधरमुपमर्दयितुमेव तार्किकैकगम्या भाषया निबद्धः, यत्र च प्रायः सर्वेषां प्रसिद्धप्राचीनाचार्याणां मतोल्लेखो बहुत्र खण्डनञ्च, सोऽयंद्वितीयखण्डस्थः सर्वप्रथमोऽलङ्कारग्रन्थः । येन खलु साहित्यशास्त्रे अलब्धप्रवेशेन बालेन नाद्यापिज्ञातं यत्का नाम उपमा किञ्च तस्या लक्षणम्, येन च नाद्यावध्यधीतः कश्चनाऽलंकारग्रन्थः सएष अलंकारकौस्तुभोक्तामिमाम्-'यत्साहश्यप्रतियोगितायामुपमेयतावच्छेदकावच्छिन्नस्य, स्वाश्रयमात्रवृत्तिस्वानवच्छेदकधर्म समानाधिकरणोभयाभावः सोपमे' त्यादिकं पृष्ठशतद्वया दप्यधिकमवच्छेद-

कतामकारतामयं खण्डग्रन्थं कथमिवाधिगच्छेदिति तु कदाचित्पाठ्य-ग्रन्थनिर्धारका एव जानीयुः।

वयन्त्वेवं सम्भावयामः-यत्—पाठ्यतया निर्धार्य पूर्वाभिमुखं स्थापिता इमे ग्रन्थाश्चपलस्वभावतया अनुक्ता एव पश्चिमाभिमुखाः संवृत्ताः । निर्धारकैरपि रसे निमग्नैर्वा मोहे निलीनैर्वा तदुपेक्षितं चापलम् । परमुपेक्षयाऽनया छात्राणां शिरसि निपतितो वज्रप्रहारः । लुप्तप्रायश्च तादृशग्रन्थप्रचारः । प्रारम्भ एव स्थापितान् रसगङ्गाधरादीन् प्रायो न कोपि परीक्षार्थी अधीते ।

यदि पुनरुच्येत-एतेषां विकल्पे स्थापिता ग्रन्थाः समीचीना इति । ननुकिमेतावता ? नखलु देवदत्तस्य सौन्दर्यवर्णनेन यज्ञदत्तस्य कुरूपता परिहृता भवति । किञ्च रसगङ्गाधरस्य विकल्पे स्थापितः कुवलयानन्दोपि केसरिप्रतिद्वन्द्विनमजं स्मारयति । एतान्येव कारणानि यद् असुतत्वं प्रयच्छन्त्यपीयं सुरभारती मृतेत्युच्यते । न खल्वियं मृता-नापि सम्भवी मृत्युरस्याः । प्रणयिनस्त्वस्या मृतप्राया इति निश्चितमेव ।

मान्य महाभागाः! मन्ये बह्वपराद्धं मया मान्येषु पौरोभाग्यमाचरता। परं विदितमेवेदं श्रीमतां यन्निद्राविद्रावितसंज्ञान् कांश्चिदपि निरीक्ष्य क्षुद्रोपि चापलं तनुते—तदेवं तथाभूतेषु यदि मयाप्यवलम्बितं किञ्चद् वैयात्यं किमत्र चित्रम् ? यदि पुनर्ममैतेन चापलाञ्चितेन विगततन्द्राः श्रीमन्तः साहित्यतत्त्वज्ञाः सुरभारतीसमुद्धरणाय सन्नद्धाः बद्ध परिकराः स्युस्तदा तत्र भवद्भिर्भर्त्स्यमानमपि तर्ज्यमानमपि च कृतार्थमात्मानं बहु मानयिष्ये । एवं कृतोत्साहानां भवतां न केवलं सुरभारती सुरा अपि साहाय्यं विदधीरन्निति दृढो मे विश्वासः । तदेवमर्वाचीनसंस्कृतसाहित्यस्य वर्तमानां दशामधिकृत्य समुज्ज्वलस्तमिस्रश्चेति दर्शितं पक्षद्वयम् । मत्सम्बन्धे किमस्माकं कर्तव्यमितितु अन्तिमपक्षेणैव उक्तार्थमिति न पृथग् वर्णन मर्हति इति ।

सुरभारतीसन्देशः।

(गीतिः)

अयि वन्दीयभावाः ! सदया ! महानुभावाः !
भवतोऽवतो रसज्ञान् सुरभारतीदमाह । १
विनयो नयोचितज्ञैश्च निरादरो विधेयः ।
दरकारणं विचेयं गदवारणं विधेयम् । २
अधिकर्णमर्पणीया सुचिरं विचारणीया ।
हृदये निवेशनीया सुरभारतीकथेयम् । ३
"इदमस्ति भारतं मे ननु भारतीयमस्मि ।
सुरतामुपेतवन्तो मम भावमाश्रिता ये । ४
प्रलयोदयौ तु सृष्टेः शतशो मयाऽनुभूतौ ।
जगदादिसंविधा मे नयनाग्रतः स्फुरन्ति । ५
कमलासनः स वक्ता ऋषयः श्रुतार्थिनस्ते ।
सहचारिणी च साऽहं जगतः पितामहस्य । ६
नवसर्गवर्गवेदीवेदोपदेशयज्ञे ।
स्मृतिगोचरीभवन्ती परिमोहयत्यजस्रम् । ७
कुरुते पुरोगतं याऽखिलभूतभाविभव्यम् ।
मयि सा समाधिविद्या बहुभिः समाहितेयम् । ८
मनसामनिषणीयं वचसामगोचरं यत् ।
न तदक्षरं विदूरे ननु मे स्तनन्धयानाम् । ९
विषयावलीवलीढा ज्वलदाधयो विदूनाः ।
मम सन्निधौ समेताः शममाशु संश्रयन्ते । १०
* जगतीतलं च जित्वा बहुलैर्बलै रुदग्राः ।
मम सूनुसङ्गमेन महिमानमुत्सृजन्ति । ११
परिचारिता पृथिव्यामिह सा मयैव नीतिः ।
अबलो यया बलीयान् बलवत्सु निर्विशङ्कम् । १२

* श्रीकन्द्र (सिकन्दर) स्य ऋषिसमागमकथाऽत्रानुसन्धेया ।

इह धर्मभीतिरेषा परलोकभीतिरेषा ।
परिलक्षिताऽन्यगेहे कतमेन वा ? क्व चेयम् ? । १३
स्मरणीयनीतिविद्या निखिलाऽवनीहिता या ।
रामादिभूपभूषा परिपोषिता मयेयम् । १४
ऋषयो वशिष्ठमुख्या मम रक्षिणो यदाऽऽसन् ।
परिचारिका तदा मे जगदाधिराज्यलक्ष्मीः । १५
कपिलः पतञ्जलिस्तौ कणभुक्प्रशस्तपादौ ।
पुलिनोद्भवोमहर्षिः स च जैमिनिर्मुनीशः । १६
अमृतं निषिक्तवन्तो मम यत्कलेवरे ते ।
न हि तद्भिया यमो मे दिशि दत्तदृक् कदापि । १७
अजरीकरः प्रयोगः पणिनात्मजेन यो मे ।
मुनिना कृतः शरीरे, परिवर्तनं स रुन्धे । १८
कविकालिदासदत्तं नयनामृतं मदीये ।
कुरुते दृशौ सशक्तौ परिलोकितुं दिगन्तम् । १९
इतिवृत्तमेतदेवं हहहा गतं तदेतत् ।
अधुना तु शोचनीयं कुदशान्तरं गताऽहम् । २०
अलसो विमूढचेताः सकलोपि मे स्ववर्गः ।
सकलेशताविहीना बत दुर्गतिवहेऽहम् । २१
जगदाधिराज्यलक्ष्मी ललितौ यदीयपादौ ।
वसनाशनाय साऽहं "सभासु" याचे । २२
वसनाशनैर्मदीयैरुपजीविता यदम्बा ।
कथयन्ति हन्त ! ते मां 'हतभागिनी मृतेयम्' । २३
भृशमस्मि जातलज्जा भवदीयपौरुषेषु ।
दलितामहो, यदन्यैर्ननु मातरं सहध्वम् । २४
वरमस्मि वन्ध्यगर्भा न पुनर्निरीहमन्दैः ।

अलसैः सुतैरसंख्यैरिह पुत्रिणी भवेयम् । २५
मम दुर्गतं न चिन्त्यं मरणं वरं मदीयम् ।
न पुनः सपत्नजानां कटुभाषितं सहेयम् । २६
किमिदं न शोचनीयं निमिषस्तु हा, भवतु ।
यदहं स्वयं सशस्त्रा समराय साधयेयम् ।
स्मरणीयमेतदद्धा ननु सा समाधिसिद्धिः ।
विपदेकरक्षिणी मे जगदादिभूविसृष्टा । २८
यदहं बहु प्रदूना न च रक्षिता भवद्भिः ।
करुणामयान्तरां तां सुसखीं समाश्रयेयम् । २९
शयिता तदङ्कशय्यामधिशय्य निर्विशङ्कम् ।
चिरकालजातक्रोधा पुनरप्यहं वहेयम् । ३०
परमेतदेव चिन्त्यं वदनेषु वो विलग्ना ।
मलिना कलङ्कलेखा सुशका विमार्जितुं किम् ?। ३१
जननीमरक्षयित्वा सुकृतं च भक्षयित्वा ।
किमु जीवनाय कश्चिद् वरसंश्रयं गतोऽहम् । ३२
तदतः परं न शक्ता गदितुं सगद्गदाऽहम् ।
रहसि स्थिता विशङ्कं करुणञ्च रोदयेयम् ” । ३३
विनयो नयोचितश्चेन्न निरादरो विधेयः ।
दरकारणं विचेयं गदवारणं विधेयम् । ३४
अधिकर्णमर्पणीया सुचिरं विचारणीया ।
हृदये निवेशनीया सुरभारतीकथेयम् । ३५

॥ इति ॥